303
1795

4

कुवलयानंद

Koowulya Nund.

॥ कुवलयानंदप्रारंभः २००० ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

श्रीगणेशायनमः॥ अमरीकबरीभारचमरीमुखरीकृतं॥ दूरीकरोतुदुरितंगौरीचरणपंकजं॥१॥परस्परतपःसंपत्फलायि
तपरस्परौ॥ प्रपंचमातापितरौ प्रांचौआयापतीस्तुमः॥२॥उद्ग्राह्ययोगकलया हृदयाब्जकोशंधन्यैश्चिरादपियथारू चि
गृह्यमाणः॥ यःप्रस्फुरत्यविरतंपरिपूर्णरूपःश्रेयःपरंरिरतुराश्चतिकंमकुंदः॥३॥ अलंकारेषुवालानांमवगाहनसि
द्धये॥ लक्षितःक्रियंतेतेषांलक्ष्यलक्षणसंग्रहः॥४॥येषांचंद्रालोकेदृश्यंतेलक्ष्यलक्षश्लोकाः॥ प्रायस्तएवतेषामितरेषां
लक्षिनवाविरच्यंते॥५॥उपमायत्रसादृश्यलक्ष्मीरुल्लसतिद्वयोः॥ हंसीवलघ्नतेकीर्तिःस्वर्गेगावृगाहते॥६॥यत्रोपमानोप
मेययोःसहृदयहृदयाह्लादिनचारुसादृश्यमद्भुततयोल्लसतिवंग्यमर्थांदाविनास्पष्टंप्रकाशतेतत्रोपमालंकारः॥ हंसीवेत्युदा
हरणं॥ इयंचपूर्णोपमेत्युच्यते॥ हंसीकीर्तिःस्वर्गेगावृगाहनमिवराश्वदृश्यतेतयोःउपमानोपमेयसाधारणधर्मोपमाकाचकानाचतु
र्णांमध्यादानात्॥यथावा॥ गुणदोषावुद्भावयतालंक्रियेदुष्टेवाविवेश्वरः॥ शिरसाश्लाघतेपूर्वंपरंकंठेनियच्छति॥७॥अत्रयद्यपिउपमा
नोपमेययोर्नैकःसाधारणोधर्मः॥उपमानेईश्वरेचंद्रगरलयोर्गृहणंउपादानं॥तयोर्मध्येपूर्वस्यचंद्रस्यशिरसाश्लाघनंवहनं॥उ
त्तरस्यगरलस्यकंठेनियमनंस्थापनेउपमेयबुधेगुणदोषयोर्ग्रहणंज्ञाने॥तयोर्मध्येपूर्वस्यगुणस्यशिरसाश्लाघनंशिरःकंपेनाभि
नंदनमुत्तरस्यदोषस्यकंठेनियमनंकंठादुपरिवाचानूद्घाटनमितिभेदात्॥तथापिचंद्रगरलयोर्गुणदोषयोश्चबिंबप्रतिबिंबभावेन
अभेदात्॥उपादानज्ञानादीनांगृह्यन्तेत्यकराद्दोषादानेनभेदाध्यवसायाच्चसाधारणधर्मतातिपूर्वस्माद्विशेषः॥वस्तुतोभिन्नयो
रपिउपमानोपमेयधर्मयोःपरस्परसादृश्यादभिन्नयोःसत्यगुणादानंबिंबप्रतिबिंबभावइत्यालंकारिकसमयः॥वर्ण्योपमानधर्मो
णामुपमावाचकस्यच॥एकद्वित्र्यनुपादानेभिन्नाकुलोपमाष्टधा॥८॥तद्विद्वोरीदृतुल्यास्याकपूरंतीदृगेमम॥कांत्यास्मरवधूयंती दृ
ष्टातन्वीरहोमया॥९॥यत्रयोमेलनंतत्रसाधोमेयश्चतद्धेतेः॥ तदेतत्काकतालीयमवितर्कितसंभवं॥१०॥उपमेयादीनांचतुर्णांम
ध्येएकस्यद्वयोस्त्रयाणांवाप्रतिपादकशब्दाभावेनलुप्तोपमेत्युच्यते॥सान्वाष्टधा॥यथा॥वाचकलुप्ता॥धर्मलुप्ता॥धर्मवाच
कलुप्ता॥वाचकोपमेयलुप्ता॥उपमानलुप्ता॥वाचकोपमानलुप्ता॥धर्मोपमानलुप्ता॥धर्मोपमानवाचकलुप्ता॥चेति॥तत्रो
पमानलोपरहितास्त्वाद्यानेदास्तद्विद्वोरीत्यादिश्लोकेनप्रदर्शिताः॥तद्वेतोर्नेदमुत्तरश्लोकेन॥तद्विद्वोरीत्यत्रवाचकलोपः॥

३०२
१९९५

तद्विद्वगौरीत्यर्थेउपमानानिसामान्यवचनैरितिसमासविधायकशास्त्रंकृतः॥ इदंतुत्वास्येत्यत्रधर्मलोपस्त्वेषिकोनशास्त्रक
तः॥ कांत्याइदंतुत्वास्येत्यपिवक्तुंशक्यत्वात्॥ कर्पूरमिवआचरंतीत्यत्रधर्मवाचकलोपः॥ कर्पूरमिवआचरंतीत्यर्थेविहितस्यकर्पूरवदानंदास्य
काचारार्थस्यक्विपःइवशब्देनसहलोपात्॥अत्रधर्मलोपस्त्वेषिकः॥नयनयोरानंदात्मकतयाकर्पूरंतीतितदुपादानस्यापिसंभवा
त्॥कांत्यास्मरवधूयंतीत्यत्रवाचकोपमेयलोपः॥अत्रकांत्यतिविशेषणसामर्थ्यात्स्वात्मानंकामवधूमिवाचरंतीत्यर्थस्यगम्यमान
यास्वात्मनउपमेयस्यसहोपमावाचकेनानुपादानात्॥सत्वेषिकः॥स्वात्मानंस्मरवधूयंतीत्यपमेयोपादानस्यापिसंभवात्॥का
कतालीयमीत्यत्रकाकतोत्पतनविषयेकाकतालसमवेतक्रियावृत्तिनीतेनकाकागमनमिवतालपतनमिवकाकता
लमितिवाचेसामासाच्चतद्विषयादितिज्ञापकात्समासः॥उभयत्रोपमेयंक्रमेणस्यस्यक्वचिद्गमनंतत्रवरहसितव्या॥अवस्थानं
च॥तेनस्यतव्याश्वसमागमःकाकतालसमागमः सदृशइतिफलति॥ततःकाकतालमिवकाकतालीयमितिद्वितीयास्मिन्
वार्थेसमासाच्चतद्विषयादिति॥सूत्रेणइवप्रतिरूपतादित्यधिकारस्थेनछप्रत्ययःतथाचपतनदर्शितंतालफलंयथाकाकेनापभुक्त
एवंरूपादर्शनंक्षुभितदयातन्वीस्वेनापभुक्तमितदर्थः॥ यथाचात्रकाकागमनंतालपतनसमागमरूपस्यकाकक्रतुतालीभा
गरूपस्यचोपमानस्यानुपादानात्॥प्रययार्थोपमायाउपमानलोपः॥समासार्थेपमायांवाचकोपमानलोपःसर्वोपयंलोप
श्चेत्यत्रयविधायकशास्त्रंकृतः॥अवितर्कितसंभवमितिसाधारणधर्मस्यानुपादानंप्रययार्थोपमायांधर्मोपमानलोपः समास
र्थोपमायांधर्मोपमानवाचकलोपइतिसूक्ष्मदृशाविधानव्यं॥तथाउदाहरणांतराणिविस्तरभयान्नलिख्यंते॥उपमानोपमेय
लयदेकस्यैववर्णनंः॥ इंदुरिंदुरिवश्रीमानित्यादौनंदनन्वयः॥९॥एकस्यैववर्णनंउपमानोपमेयत्ववर्णनमनन्वयः॥वर्ण्यमा
नमपिस्वस्यस्वेनसाधर्म्येणान्वेतीतिव्युत्पत्तेः॥अनन्वयिनोप्यर्थस्यान्विधानंसदृशांतरव्यवच्छेदनानुपमेयत्वख्यातनायाइंदु
रिंदुरिवश्रीमानित्यत्रेंदुश्रीमत्वचंद्रस्यनान्यःसदृशोस्तीतिसदृशांतरव्यवच्छेदोलक्ष्यतेतत्रश्वसनापिसादृश्यासंभवाद
नुपमेयत्वपर्यवसाने॥यथावा॥गगनंगगनाकारंसागरसागरोपमः॥रामरावणयोर्युद्धंरामरावणयोरिव॥१०॥पूर्वोदाहरु
णश्रीमत्वस्यधर्मस्योपादानमिति॥इंदुगगनादिषुचपुल्यादधर्मस्यतन्नास्तिइतिविशेषः॥पर्यायेणद्वयोस्त्रयाणांवाप्रतिपादकशब्दाभावेन

पमा मता॥ धर्मोर्थइव पूर्णश्रीरर्थोधर्मइवत्वयि॥१३॥ द्वयोःपर्यायणोपमानोपमेयत्वकल्पनंतृतीयसादृश्यव्यवच्छेदार्थं॥ धर्मा र्थ
योर्हिकस्यचित्कनचित्सादृश्यवर्णितस्यार्थेनेनसादृश्यमर्थतःसिद्धमपिमुखतोवर्ण्यमानंतृतीयसादृश्यव्यवच्छेदार्थंफलति॥ यथा
वा॥ खमिवलंजजलमिवखंहंसश्चंद्रइवहंसश्चंद्रः॥ कुमुदाकारास्तारास्ताराकाराणिकुमुदानि॥१४॥ पूर्वत्रपूर्णश्रीरिति ध
र्मउपात्तःइहनिर्मलत्वादिधर्मोनोपात्तइतिनेदमुदाहरणद्वयेपिप्रस्तुतयोरेवोपमानोपमेयत्वकल्पनंराज्ञिधर्मार्थसमृद्धः इ
रद्गिगनसलिलादिनैर्मल्यस्यचवर्णनयित्वात्॥ आस्तांप्रस्तुतयोरेषासंभवति॥ यथावा॥ गिरिवगजराजोयंगजराजइवोच्चकै॥
र्विभातिगिरिः॥ निर्झरइवमदधारामदधोरेवास्यनिर्झरःस्रवति॥१५॥ प्रतीयमुपमानस्योपमेयत्वकल्पनं॥ खद्रोचनसमंपश्चत्व
द्मुखसदृशोविधुः॥१६॥ प्रसिद्धोपमानोपमेयप्रातिलोम्यात्प्रतीपं॥ यथावा॥ यच्चन्नेत्रसमानकांतिसलिलेमग्नंतदिंदीवरंमेघैरंतरि
तः॥ प्रियेतवमुखछायानुकारीशशी॥ येपिखद्गमनानुसारिगतयस्तेराजहंसागतास्त्वत्सादृश्यविनोदमात्रमपिदैवेननक्षम्यंते
१७॥ अत्रोपमेयत्वान्नेनवर्ण्यस्यानादरश्चतत्॥ अलंगवर्ण्येतवकांताचंद्रोपितादृशः॥१८॥ असत्कल्पगुणतयावर्ण्यमान
स्यखसादृश्यमसहमानस्योपमेयंकिंचित्प्रदर्श्यतावतातस्यतिस्कारोद्वितीयंप्रतीपंपूर्वस्मादपिविशिष्यतिविशेषत्वशात्की॥ य
थावा॥ गर्वमसंभाव्यमिमंलोचनयुगलेनकिंवहसिनेंद्र॥ संतीदृशानिदिशिदिशिसरःस्वननुनीलनलिनानि॥१९॥ वर्ण्योप
मेयत्वान्नेनतथान्यस्योपनादरः॥ कःकोयंदर्पस्तेमृगेलतुल्यास्संतिहिस्त्रियः॥२०॥ असत्कल्पगुणतयाकचिदप्युपमानत्वमव
सहमानस्यअवर्ण्यस्यवर्ण्यमुपमेयंपरिकल्प्यतावतातस्यतिरस्कारःपूर्वप्रतीपंवैपरीत्येनतृतीयंप्रतीपं॥ यथावा॥ अहमेवगुरुः
स्कारुणानामितिहालाहलमास्मतातदृश्यः॥ नुसंतिन्नवादृशानिभूयोन्यवनेसिन्वचनानिदुर्जनानां॥२१॥ वर्ण्येनान्यस्योपमा
यामानिष्पत्तिवश्चश्चतन्मुधापवादोमुग्धासित्वन्मुखालंकिलोबुजं॥२२॥ अवर्ण्येवर्ण्योपमित्यनिष्पत्तिवचनं॥ पूर्वेभ्यउत्कर्षशा
लिचतुर्थंप्रतीपं॥ उदाहरणंमुधापवादइत्यत्रोपमित्यनिष्पत्तिरुक्ता॥ यथावा॥ आकर्णयसरोजाक्षिवचनीयमुदंमुखि॥श
शोकलवक्षणपामेरुरुपमीयते॥२३॥ प्रतीपमुपमानस्यकेमर्थ्यमपिभज्यते॥ दृष्टंचेद्दृदनंतस्याःकिंपद्मेनकिमिंदुना॥२४॥ उपमे
यस्योपमानत्रयोजकपूर्वहेतूनोपमानप्रातिलोम्यात्पंचमंप्रतीपं॥ यथावा॥ तदोजसःतद्यशसःस्थितावियोद्यतिचित्तकुरुतय

304
1995

दायदा॥ तनोतिभानोःपरिवेषकैतवान्ददाविधिःकुंडलतांविधोरपि॥२५॥ केचिदनन्वयोपमेयोपमांप्रतीपानोपमाविशेषत्वेनतद्
तन्नावमन्यंते॥ अन्येतुपंचमंप्रतीपप्रकारमुपमानास्येपरूपत्वादास्येपालंकारमाहुः॥ विषय्यनेदताद्रूप्यरंजनंविषयस्ययत्॥ रूपकं
ततत्रिधाधिक्यन्यूनत्वानुन्नयोक्तिभिः॥२६॥ अयंहिधूर्जटिःसाक्षाद्येनदग्धाःपुरःक्षणात्॥ अयमास्तेविनाशंकस्तानयीकंविलो
चनं॥२७॥ शंकविश्वमयंपश्यन्सत्यसमदृष्टितां॥ अस्यामुखेंदुनालक्ष्येनेनानंदकिमिंदुना॥२८॥ साध्वीयमपरालक्ष्मीरमृधा
सागरोदिता॥ अयंकलंकिनश्चंद्रान्मुखचंद्रोतिरिच्यते॥२९॥ विषय्युपमानभूतंपश्चादि॥ विषयस्तूपमेयंवर्णनीयंमुखादि॥ विषयि
णोनेदेनताद्रूप्येणचविषयस्यरंजनंरूपकं॥ अन्यरूपेणरूपनतःकरणात्॥ तच्चकचित्प्रसिद्धविषय्यनेदेपर्यवसितंकचिद्धेदप्रतीय
मानएवतदीयधर्मारोपमात्रेपर्यवसितंततश्चरूपकंतावत्द्विविधं॥ अनेदरूपकंताद्रूप्यरूपकमिति॥ द्विविधमपिप्रत्येकंत्रिविधं
प्रसिद्धविषयाधिक्यवर्णनेनतन्न्यूनत्ववर्णनेनअनुन्नयोक्त्याच॥ एवंरूपकंषड्विधं॥ अयंहासादिसार्धश्लोकेनानेदरूपकाणि॥ अ
स्यामुखेंदुनेत्यादिसार्धश्लोकेनताद्रूप्यरूपकाणिचाधिक्यन्यूनत्वानुन्नयोक्त्युदाहरणानि॥ येनदग्धाइतिवि
शेषणेनवर्णनीयराज्ञिप्रसिद्धशिवानेदानुरंजनाच्छिवस्यपूर्ववस्थातोवर्णनीयराजभावावस्थायांन्यूनत्वाधिक्यवर्णनाच्च
मत्कारकारी॥ नुन्नयानेदेनरूपकमाद्यं॥ तृतीयलोचनग्रहणोक्त्यापूर्ववस्थातोन्यूनतादर्शनान्न्यूनानेदरूपकंद्वितीयं॥ न्यूनत्ववर्णो
नमप्यनेदादाद्योपपादकत्वाच्चमत्कारकारि॥ विषमदृष्टित्वपरित्यागेनजगद्रक्षकत्वोक्त्याशिवस्यपूर्ववस्थातोवर्णनीयराजभावावस्थ
यांउत्कर्षविभावनादधिकानेदरूपकमिदंतृतीयं॥ एवमुन्नत्वताद्रूप्यरूपकोदाहरणेषपिक्रमेणानुन्नयान्यूनाधिकभावाउन्नेया
श्चनेनेवक्रमेणोदाहरणांतराणि॥ चंद्रज्योत्स्नाविशदपुलिनेसैकतेस्मिन्शरण्यावादधुतचिरतरमभूस्सिद्धयोःकयोश्चित्॥ एकोव
क्त्रिप्रथमनिहतंकेटनंकंसमन्यस्त्वंसत्वंकथयनगवनूकोहतस्तत्रपूर्वं॥३०॥ अत्रसत्वमित्यनेनकंसकेटन्योर्हंतागरुडध्वजस्त
त्तादात्म्यंवर्णनीयस्यराज्ञःप्रतिपाद्यतेप्रतिकंसकेटन्योर्वधयोर्वीर्यप्रश्नव्याजेननत्तादात्म्यदृढीकरणात्तावद्वस्थातउत्कर्षापकर्ष
योरविभावनाच्चानुन्नयानेदरूपकं॥ वेधाद्वेधान्मंचकेकांतासकनेकपुंच॥ तासुतेषुप्यनासन्नःसाक्षाद्भोगीनराहतिः॥३१॥ अत्रसा
क्षादितिविशेषणेनविरक्तस्यप्रसिद्धस्यशिवतादात्म्यमुपदिश्यनराहतिरितिदिव्यमूर्तित्वैकत्यप्रतिपादनान्न्यूनानेदरूपकं॥ त्वय्या

३

गतेकिमितिवेषतएषसिंधुस्त्वंसेतुमंथस्तरेः किमंसोविनेति॥ द्वीपांतरेपिनहितेस्यवरांवदोद्यत्वारोजपुंगवनिषेवतएवलक्ष्मीः॥३२॥अत्रयंसेतुमंथस्तरितिसेतारस्तंतमंथनस्यचकर्त्रापुरुषांतमनवणीतीयस्यतादात्म्यमुक्तातथापित्वद्रागमनंसेतुबंधनायामंतमंथनायवेतिसमुद्रेणवाज्ञेतव्यं॥ द्वीपांतराणामपित्वद्वरागतत्वेनपूर्ववतद्वीपांतरेजेतव्यानावाप्तालक्ष्मीकत्वेनमंथनप्रसक्तयाभावाच्चेतिपूर्ववस्तातउत्कर्षविनाभावनादधिकारूपनेदकं॥किंपश्यस्मरचिंनहंतिनयनानंदंविधत्तेनकिंदृष्ट्वाश्लेषकेतनस्यकरतेनालोकमात्रेणकिं॥वक्त्रेदोतवसंत्ययंयदपरःशीतांशुरुन्नेतेदर्पःस्यादमतेनचेदिहतदप्यस्यैवबिंबाधरे॥३३अन्यापरःशीतांशुरित्यनेनैववक्त्रेदोःप्रसिद्धचंद्रादुरमाविष्कृत्यप्रसिद्धचंद्रकार्यकारित्वमात्रप्रतिपादनोनोत्कर्षापकर्षयोरदर्शनादनुन्नयताद्रूप्यरूपकं॥अचतुर्वदनोब्रह्माद्विबाहुरपरोहरिः॥अनालक्षोचनःशंभुर्नगवान्बादरायणः॥३४॥अत्रब्रह्मादावपरइतिविशेषणात्त्रिषुमिताद्रूप्यमात्रविवक्षाविनावितातचतुर्वदनत्वादिवैकल्यंचोक्तमितिन्यूनताद्रूप्यरूपकं॥इदंविशेषोक्तेरुदाहरणमितिवामनमतं॥यदाह॥एकगुणहानेरन्यगुणसाम्यादौविशेषोक्तिरिति॥किंमसृणिग्लपितजडमन्यसमयिनिमज्जतुनीमसृतामनः॥ममविलश्रुतिमाहतदर्थिकांक्षमखंडुपरांविबुधःस्मरः॥३५॥अत्रदमर्थेनीलतचंद्रोपालंनेप्रसिद्धचंद्रोननिर्याणकालिकमनः॥प्रवशाश्रुतितात्पर्यविषयःकिंतुनलमखचंद्रएवेततोस्याधिक्यप्रतिपादनाधिकताद्रूप्यरूपकं॥रूपकस्यसावयवत्वनिरवयवत्वादिनेदप्रपंचनंतुचित्रमीमांसायांद्रष्टव्यं॥परिणामःक्रियार्थश्चेद्विषयीविषयात्मना॥प्रसन्नेनदृगब्जेनवीक्षतेमदिरेक्षणा॥३६॥यत्रोरीप्यमाणोविषयीकिंचित्कार्योपयोगित्वेननिबध्यमानःस्वतस्तस्यतदुपयोगित्वासंभवाल्लक्षणार्थात्मतापत्तिमपेक्षतेतत्रपरिणामालंकारः॥तत्रोदाहरणंप्रसन्नेनेति॥अत्रेह्यब्जस्यवीक्षणोपयोगित्वंनिबध्येतनतुदृग्मयूरव्यंसकादिसमासेनोत्तरपदार्थप्राधान्यात्॥नचोपमितसमासाश्रयेणदृगब्जमिवेतिपूर्वपदार्थप्राधान्यमस्त्विति वाच्यं प्रसन्नेनेतिसामान्यधर्मप्रयोगादुपमितंव्याघ्रादिनिःसामान्यप्रयोगइतितद्प्रयोगएवोपमितसामान्यानुशासनात्॥अब्जस्यवीक्षणोपयोगित्वंनस्वातंत्र्येणवतिइत्यतस्तस्यप्रकृतदृगात्मनापरिणत्यपेक्षणात्परिणामालंकारः॥यथावा॥तीर्त्वाभूतेशमौलिस्थजममरधुनीमात्मनोसौतृतीयस्तस्मैसोमित्रिमैत्रीमयमुपकृतवानोतरंनाविकाय॥व्याभग्नाह्यस्तनीनिःशंवरयवतिनिःकोतुकी

३

311
1995

दंचदृशंकृष्णादुच्चीयमानःक्षणमचलमथोचित्रकूटंप्रतस्थे॥३७॥अत्रारोप्यमाणभ्रातरसौमित्रिमंत्रीरूपताप्त्यागुहोपकारलक्षणकार्योपयोगी॥नस्वात्मनागुहस्यरघुनाथैकप्रसादोपेक्षकत्वेनवेतनार्थित्वाभावादितिपरिणामः॥बहुनिर्बहुधाद्वेत्यादिकस्यादेखरश्चेतस्त्रीनिकामार्थिनिःस्वदुःकालःशत्रुनिरक्षसः॥३८॥यत्रनानाविधधर्मयोग्यमेकंवस्तुतथर्मयोगरूपनिमित्तंनेदानेकयहीनानेकधोल्लिख्येततत्रोल्लेखः॥अनेकधोल्लेखनरूप्यार्थित्वनयादिकंयथाहेप्रयोजकं॥रूचिरभिरतिः॥अर्थित्वंलिप्सानीतिर्नेयं॥स्त्रीनिरित्याद्युदाहरणं॥अत्रैकएवराजासौदर्यवितरणपराक्रमशौर्यकीर्तिस्त्रीनिरार्थिनिःप्रत्यर्थिनिश्चरूप्यार्थित्वंनयेःकामकत्यतरत्कालरूपोदृष्टः॥यथावा॥जगन्नातेतिदृष्टान्निःश्रीकांतइतियोवतेः॥यथास्खलितश्चबालानमिदृष्टःशोरिःसकौतुकं॥३९॥अत्रयस्ततथानीतंनक्रंगजेत्वरयात्रायंतमसोयमादिपुरुषोनमरतिदृष्टान्निःसंसारनीत्यातदनयार्थिनीनिः॥दृष्टोयंमथुरापुरंप्रविशति दृष्टःयस्तथाचंचलत्वेनप्रसिद्धायाःश्रियोपिकामोपचारवेदग्ध्येननित्यंवल्लभःयंसोरिंयुवतियवतिसमूहेःसाकूतंदृष्टः॥बालानिस्कंधात्यगतरूपवेषालंकारदशानामत्रालक्षसान्निर्यथावस्थितवेषादियुक्तोदृष्टइतिबहुधोल्लेखः॥पूर्वकामलताद्योरोपरूपकसंकीर्णः॥अयंतुश्लेषइतिनेदः एकेनबहुधोल्लेखेप्यसोविषयनेदतः॥गुरुर्वंचस्यर्जुनोयंकौंतीभीष्मःशरासने॥४०॥गृहीत्वनेदानीवेपिविषयनेदाद्बहुधोल्लेखनादसौउल्लेखः॥उदाहरणंश्लेषसंकीर्णवचोविषयेमहानुपटुरितिवत्॥बृहस्पतिरित्याद्यर्थांतरस्यापिक्रोडीकरणात्॥स्मृद्धेयथा॥अहरींकुचयोःश्रोणंवलग्नेविपुलंचक्षुषिविस्तृतंनितंबे॥अधरेरुणमाविरस्तचित्तेकरुणारागःलिकपालिनागधेयं॥४१॥स्यात्स्मृतिर्भ्रांतिसंदेहैस्तदंगलक्षितत्रयं॥पंकजंपश्यतःकांतामुखंमेगाहतेमनः॥४२॥अयंश्रमनमधुपस्तन्मुखंवेतिपंकजे॥पंकजेवासकृद्धांशुर्वेत्यस्माकंभ्रमेतमनः॥४३॥स्मृतिर्भ्रांतिसंदेहैःसादृश्येनिबध्यमानैः॥स्मृतिमान्भ्रांतिमान्ससंदेहइतिस्मृत्यादिपादोक्तिभेदालंकारत्रयंनवति॥तच्चक्रमेणोदाहृतं॥यथावा॥दिव्यानामपिरूपविस्मयांपुरस्तादंभस्तःस्फरदरविंदचानहसां॥उद्दीप्तश्रियमेवकांचिदुत्तरं तीमसाधीजलनिधिमस्यानस्यशोरिः॥४४॥पूर्वत्रस्मृत्युदाहरणमत्रमसेयंस्मृतिः॥अत्रसदृशालक्ष्मीस्मृतिपूर्वकंतत्संबंधिनीजलनिधिमथनस्यापिस्मृतिरितिभेदः॥पलाशकुसुमभ्रांत्याशुकतुंडउपतस्थिवान्॥सोपिजंबूफलभ्रांत्यातमलिंधनुरुच्छति॥४५॥अत्रान्योन्यविषयभ्रांतिनिबंधनःपूर्वस्माद्विशेषः॥जीवनंयहणेनभ्रांतेर्लाघवं

स्तनताःस्थि॥किंकनिष्ठाःकिमज्येष्ठाघटीयंत्रस्यदुर्जनाः॥४६॥पूर्वोदाहृतसंदेहःप्रसिद्धकोटिकः॥अयंतुप्रसिद्धकोटिकइतिभेदः॥सु
द्धापन्हुतिरन्यस्यारोपार्थोधर्मनिन्हवः॥नायंसुधांशुःकिंतर्हिव्योमगंगासरोरुहं॥४७॥वर्णनीयवस्तुनितरसद्धर्मारोपफलकस्तदी
यधर्मनिन्हवःकविमतिविकासात्प्रसिद्धधर्मांतरस्यापिनिन्हवःशुद्धापन्हुतिःयथाचंद्रेद्युनदीपुंडरीकत्वारोपफलकस्तदीयधर्मस्यचंद्रत्व
स्यापन्हवः॥यथावा॥अंकेकपिराशंकिरजनिधयकंपेरमनिरसारंगंकतिचित्रसजगदिरंभूछायंमछन्येरं॥इंदोयदिलंतंद्रनीलशकं
लश्यामंदरीदृश्यतेतत्सांद्रनिशिपीतमंधतमसंकुक्षिस्थमाचक्ष्महे॥४८॥अत्रोल्लसितधर्माणमेवापन्हवःसचनवाचिनिकः किं
तुपरस्तोपन्यासादर्थसिद्धःसएवयत्नेनुक्तश्चेद्दुष्यतेहेत्वपन्हुतिःनेंदुस्त्रीवाननिराकार्यःसिद्धारोवोयमुचितः॥४९॥अत्रचंद्रए
वतीव्रत्वनेरात्र्युक्तिर्व्याचंद्रत्वसूर्यत्वापन्हवोवदवानलरागपार्थः॥यथावा॥मंथानन्नूमिधरमूलशिलासहस्रसंघट्टनव्रणकि
णःस्फुरंतिइंदुमध्ये॥छायामृगःशशकइत्यतिपामरोक्तिस्तेषांकथंचिदपितद्वहिनःप्रसक्तिः॥५०॥अत्रचंद्रमध्येमंथनकालिकम
दराद्रिशिलासंघट्टनव्रणकिणएवछायादीनांसंज्ञेवानास्तीतिछायात्वापन्हवःपामरवचनत्वोपन्यासेनाविष्कृतः॥अन्यत्रतस्यारोपा
र्थःपर्यस्तापन्हुतिस्तत्सः॥नायंसुधांशुःकिंतर्हिसुधांशुःप्रेयसीमुखं॥५१॥यत्रक्वचिद्वस्तुनितरीयधर्मनिन्हवःअन्यत्रवर्णनी
यवस्तुनितस्यधर्मस्यारोपार्थःपर्यस्तापन्हुतिः॥यथाचंद्रेचंद्रत्वनिषेधोवर्णनीयवस्तुनिप्रेयसीमुखेतदारोपार्थः॥यथावा॥हाला
हलेनेवविषंविषंरमाजनाःपरंत्वसुखमात्रमन्वते॥निपीयजागर्तिसुखेनतंशिवःस्मरंनिमांमुह्यतिनिद्रयाहरिः॥५२॥पूर्वोदा
हरणेहेतुर्नास्ति॥अत्रतुसोस्तीतिभेदः॥ततश्चपूर्वापन्हुवत्॥अत्रापिद्वेविध्यमितिद्रष्टव्यं॥भ्रांतापन्हुतिरन्यस्यभ्रांत्यारोपणे॥तापकरोतिसोत्कंपंज्वरःकिंनसखिस्मरः॥५३॥अत्रतापंकरोतिइतिस्मरेभ्रांतेकथितेतस्यज्वरसाधारण्यारज्जुबुध्यासख्याज्वर
किमितिपृष्टेनसखिस्मरइतितोत्त्याभ्रांतिवारणंकृतंयथावा॥नागरिकसमधिकोन्नतिरिहमहिषःकोयंमुनयतःपृच्छः॥नाहिन
हिकरिकलभोयंकुंडाहंडोयमस्यनतुपुच्छः॥५४॥इदंसंभवत्भ्रांतिपूर्विकायाभ्रांतापन्हुतेरुदाहरणं॥कल्पितभ्रांतिपूर्विकायथा
जटानेयंवेणीकृतकृष्णफलापोनगरलंगलेकस्तूरीयंशिरसिशशिरेखानकुरुमं॥इयंभूतिर्नोगेप्रियविरहजन्माधवलिमापुरा
तिभ्रांत्याकुरुमशरकिंमोह्यथयसि॥५५॥अत्रकल्पितभ्रांतिर्जटानेयंवेणीत्यादिनिषेधमात्रोक्तेया॥पूर्ववल्लक्षणाभावात्॥

४

313
1795

दंशीलक्षतलाक्षाभोपमेरूपमारक्तेदंमेने॥यदाह॥नपद्मेमुखमेवेदंनच्छेगोचक्षुषीइमे॥इतिविस्पष्टसादृश्यातलाक्षाभोपमाम
तेति॥५६॥छेकापन्हुतिरन्यस्यरोकातस्तथ्यनिन्हवे॥प्रजपन्मयदेलग्नःकांतःकिंनहिनूपुरः॥५७॥कस्यचित्कंचित्प्रतिरहस्यो
क्तावन्येनश्रुतायामकृत्रिमस्यांतरवर्णेननतथ्यनिन्हवेछेकापन्हुतिः॥यथानायिकयानर्मसखींप्रतिप्रजल्पन्मयदेलग्नइतिस्व
नायकोक्तौनिवेद्यमानेतदाकूर्व्यकांतःकिमितिशंकितवतीमन्यांप्रतिनहिनूपुरइतिनिन्हवः॥यथावा॥सीत्कारंशिक्षयतिव्रण
यत्यधरंतनोतिरोमांचं॥नागरिकःकिमुमिलितोनाहिनहिसखिहेमनःपवनः॥५८॥इदमर्थयोजननयातथ्यनिन्हवेउदाहरणं
राद्रयोजननयायथा॥पश्चात्तंनयनेस्मरामिसततंनावोनवतकुंतलेनीलिमुह्यतिकिंकरोमिमहितेःक्रीतोस्मितेविभ्रमैः॥इत्यत्रभ्र
वोनुज्ञाप्यसरूपानिर्नासितोराघवाऽघ्नस्तत्स्मरमेवतद्व्यपदिशन्क्रीडाविटःपातुवः॥५९॥सर्वमिदंविषयांतरयोजनेउदाहर
णंविषयेक्येपवस्तुन्येदंनयोजनेयथा॥वरंतीजारवृत्तांतंपत्योधूर्तासखीधिया॥पतिंबुध्वासखितताःप्रबुद्धास्मीत्यपूरयत्॥६०
कैतवापन्हुतिर्व्यक्तोक्त्याज्ञाद्येर्निगूहतेःपदैः॥निर्यातिस्मरनाराचाःकांताहृग्व्याजकैतवात्॥६१॥अत्रासत्यज्ञानिधायिनाकैतवप
देननेमकांताकटाक्षाःकिंतुस्मरनाराचाइत्यपन्हवःप्रतीयते॥यथावा॥रिक्तेषुवारिकथयाविषदेनोदरेषुमध्याह्नजृंभितमहातपता
पतप्ताः॥स्कंधांतरोल्लसितदवाग्निशिखाछलेनजिह्राप्रसार्यतरवोजलमर्थयंते॥६२॥संभावनास्यादुल्लेखावस्तुहेतुफलात्मना॥
उक्तानुक्तास्यदाद्यात्रसिद्धासिद्धास्पदेपरे॥६३॥धूमस्तोमंतमःशंकेकोकीविरहशुष्मणां॥लिंपतीवतमोंगानिवर्षतीवांजनंनभः
६४॥रक्तोतवांघ्रीमृदुलोरुविलेपणात्भ्रुवं॥त्वन्मुखानेच्छयानूनंपद्मैर्वरायतेश्रीः॥६५॥मध्यःकिंकुचयोर्ध्यत्येवधःक
नकदामभिः॥प्रायोजंतवएनंक्यंप्राप्तुंतोयतपस्यति॥६६॥अन्यधर्मसंबंधनिमित्तेनान्यस्यान्यतादात्म्यसंभावनमुल्लेखा॥
सावस्तुफलात्मगोचरत्वेनत्रिधा॥अत्रवस्तुनःकस्यचिद्वस्त्वंतरतादात्म्यसंभावनेस्वरूपोल्लेखत्युच्यते॥अहेतोर्हेतुभावेनाफल
स्यफलेनोल्लेखाहेतूल्लेखाफलोल्लेखश्चयुच्यते॥अत्रायस्वरूपोल्लेखाउक्तविषयाचेतिद्विविधा॥परेहेतुफलोल्लेखेसिद्धविषयासि
द्धविषयाचेतिद्विविधे॥एवंषण्णामुल्लेखाणांधूमस्तोममित्यादीनांक्रमेणोदाहरणानि॥रजनीमुखेसर्वत्रविस्तरस्यतमसोनेत्र
दृष्टिप्रतिरोधकत्वादिधर्मसंबंधेनगम्यमानेननिमित्तेनसद्यः॥प्रियविघटितसर्वदेशस्थितकोकांगना हृदुद्वृतश्रवलिष्यद्वि

रहानलधूमस्तोमतादात्म्यसंभावनास्वरूपोलेक्षा॥ तमसोविषयस्योपादानादुक्तविषया॥ तमोव्यापनस्यनञ्जःप्रत्यनुपपत्तेस
कलेवस्तूसांद्रमलिनीकरणेननिमित्तेनतमः॥ कर्तृकलेपनातादात्म्योलेक्षा॥ नञ्नःकर्तृकांजनवर्षणतादात्म्योलेक्षाचानुक्तविष
यास्वरूपोलेक्षा॥ उभयत्रापिविषयभूतस्यतमोव्यापनस्यानुपादानात्॥ नन्वत्रतमोदात्म्योसोव्यापनेननिमित्तमलेपनकर्तृतादा
त्म्योलेक्षानञ्नसोनुपपत्तेगाढनीलिमव्याप्तलेननिमित्तेनांजनवर्षणकर्तृतादात्म्योलेक्षाचेत्तु लेक्षाद्वयमुक्तविषयमेवास्तु॥
मेवं॥ लिंपतीवर्षतीत्याख्यातयोःकर्तृवाचकलेपिनाव्यधानमाख्यातमितिस्मर्तेधात्वर्थक्रियायाएवप्राधान्येनतदुपसर्जनत्वे
नान्वितस्यकर्तुर्लक्षणीयतयान्यत्रान्वयासंभवात्॥ अतएवाख्यातार्थस्यकर्तुःक्रियापसर्जनत्वेनान्यत्रान्वयासंभवादवहे तो
स्तस्योपमायामुपमानतयान्वयोदर्शिनानिराकृतः॥ कर्त्रांशयूपमानस्यान्यभूतासोक्रियापदे॥ स्वक्रियासाधनव्यग्रोनालमन्य
द्व्यपेक्षितुमिति॥ क्वचित्॥ तमोनञ्नसोर्विषययोस्तत्कर्तृकलेपनवर्षणस्वरूपधर्मोलक्ष्येत्याहुः॥ तन्मतेस्वरूपोलेक्षायांधर्म्युलेक्षा
धर्मोलेक्षायेयंद्वैविध्यंद्रष्टव्यंचरणयोःस्वतःसिद्धरक्तिमनिवस्तेतोविस्पंदनंनहेतुरिति॥ अहेतोस्तस्यहेतुत्वेनसंभावनाहेतू
लेक्षा॥ विस्पंदनस्यविषयस्यसत्वासिद्धविषया॥ चंद्रपद्मविरोधस्वाभाविकनायिकावदनकांतिप्रस्यानहेतुरितितत्रतथेतुत्वस
भावनाहेतूलेक्षा॥ वस्तुतस्तदिच्छायाअक्षावादसिद्धविषया॥ मध्यःस्वयमेवकुचोधरती॥ नतुकनकदामबद्धत्वेनाध्यवसितायां
वलित्रयशालितायांबलादितिमध्यकर्तृककुचधृतेस्तत्फलत्वेनोलेक्षासिद्धविषयाफलोलेक्षा॥ जलजस्यजलनिर्जातावास्थि
तेरूद्वासनतपस्त्वेनाध्यवसितायाःकामिनीचरणसायुज्यप्राप्तिर्नेफलमितितस्याःगगनकुसुमायमानायास्तपःफलत्वेनोत्प्रे
क्षा॥ अनेनैवकर्मणोदाहरणांतराणि बालेंदुवत्काण्यविकासभावाद्बृन्तःपलाशान्यतिलोहितानि॥ सद्योवसंतेनसमागतानांनस
तानीववनस्थलीनां॥ ६७॥ अत्रपलाशमुकुलानांवृन्तत्वलोहित्यसंबंधेननिमित्तेनवसंतेनायसमागतवनस्थलीसंबंधि
सद्यःक्षतनखक्षततादात्म्यसंभावनोक्तविषयास्वरूपोलेक्षा॥ पूर्वोदाहरणेनिमित्तभूतधर्मसंबंधोगम्यः इहउपात्तरतिनिदः
नन्विवशब्दस्यसादृश्यपरत्वेप्रसिद्धतरत्वादुपमैवास्तु॥ लिंपतीवेत्युदाहरणेलेपनकर्तृरूपमानलाभेस्यक्रियोपजीवनेनत्ववि

315
1995

हनखक्षतानामन्योपसर्जनत्वस्योपमाबाधकत्वाभावात्॥ उच्यते॥ उपमायाःयत्रक्वचित्स्थितेरपिनखक्षतेःसहवर्तुंशक्यतयावसंतनायक
समागतवनस्थलीसंबंधित्वस्यविशेषणस्यानपेक्षितत्वादिहतदुपादानंपलाशमुकुलानांनखक्षततादात्म्यसंभावनायोग्यवस्तुमात्र
स्योपयतीति॥ तथात्वेएवतद्विशेषणस्यसाफल्यात्॥ अस्तिचसंभावनायामपीवशब्दःदूरतिष्ठन्नूदेवदत्तइवज्ञातीतिपिनष्टीवतरंगाग्रै
समुद्रःफेनचंदनं॥ तदादायकरैरिंदुर्लिंपतीवदिगंगनाः॥ ६८॥ अत्रतरंगाग्रैःफेनचंदनस्यप्रेरणंपेषणतयोत्प्रेक्षते॥ समुद्रादु
त्थितस्यचंद्रस्यप्रथमंसमुद्रपूरप्रस्तानांकरणांदिक्व्यापनंचसमुद्रोपांतेफेनचंदनलेपनत्वेनोत्प्रेक्षते॥ उभयत्रकरणसमुद्रो
तगतफेनचंदनपूंजीभवनंदिगांधवलीकरणंचनिमित्तमितिफेनचंदनप्रेरणकरणव्यापनयोर्विषययोरनुपादानादनुक्तविषय
स्वरूपोलेक्षे॥ येषांतूपात्तयोःसमुद्रचंद्रयोरेवतत्कर्तृकपेषणलेपनरूपधर्मोत्प्रेक्षतेमतंतेषांपूर्वोदाहरणेधर्मिणिधर्म्यंतरतादा
त्म्योत्प्रेक्षा॥ इहधर्मिणिधर्मसंसर्गोत्प्रेक्षेतिनेदावगंतव्यः॥ रात्रेरवेर्दिवाचंद्रस्याभावःसन्नपिप्रतापयशसःसंसर्गेणहेतुरितितस्यतत्प्रतुल्यसंभावना॥ सिद्धविषयाहेतूत्प्रेक्षा
यथावा॥ दिवस्पताभायिषतेवमिश्राःस्वर्गोसहस्रेणसमंजनानां॥ गावोपिनेत्रापरनामधेयास्तेनेदमार्ध्यंखलुनोधकारेः॥ ७०॥ अ
त्रदिवस्पताक्रतुंस्वकरणेःसहजनलोचनानांनयनमसदेवरात्रावाध्यंप्रतिहेतुत्वेनोत्प्रेक्षतइतिसिद्धविषयाहेतूत्प्रेक्षा॥ पूरंविधुर्व
र्धयितुंपयोधेःशंकेयमेणांकमणिंकरोति॥ पयांसिदोग्धिप्रियविप्रयोगशोकाकुलानयनंनकिंयति॥ ७१॥ अत्रचंद्रेणक्रतंसमुद्रस्यक्षह
णंसदेव॥ तदंतेनक्रतस्यचंद्रकांतस्यद्रावणस्यकोकांगनाबाष्पस्रावणस्यचफलत्वेनोत्प्रेक्षतइतिसिद्धविषयाफलोत्प्रेक्षा॥ रथस्थि
तानांपरिवर्तेनायपुरातनानामिववाहनानां॥ उत्सृष्टभूमौतुरगोत्तमानांदिशिप्रतस्थेरविरुत्तरस्यां॥ ७२॥ अत्रोत्तरायणस्याश्वप
परिवर्तेनमसदेवफलत्वेनोत्प्रेक्षतइत्यसिद्धविषयाफलोत्प्रेक्षा॥ एताएवोत्प्रेक्षाःमन्येशंके ध्रुवंप्रायोनूनमित्येवमादिभिः॥
उत्प्रेक्षाव्यज्यतेशब्दैरिवशब्दोपिताद्दशइत्युत्प्रेक्षाव्यंजकत्वेनपरिगणितानांशब्दानामत्रयोगोगम्योत्प्रेक्षा॥ यथात्वत्कीर्तिर्भ्रमण
श्रांतादिवंदशस्वर्गंनिम्नगा॥ रूपकातिशयोक्तिःस्यान्निगीर्याध्यवसानतः॥ पत्र्यनीलोत्पलद्वंद्वान्निःसरंतिशिताःशराः॥ ७४॥
विषयस्यस्वशब्देनोक्तेखनंविनाविषयिवाचकेनैवशब्देनग्रहणंविषयनिगरणंतत्पूर्वकंविषयस्यविषयिरूपतयाध्यवसानमा

हार्यनिश्चयः तस्मिन्सतिरूपकातिशयोक्तिः यथा नीलोत्पलदारशरशकल्पांलोचनयोः कटाक्षाणांचयग्रहणपूर्वकंतद्रूपताध्यवसानं॥ य
थावा॥ वापिकापिविस्फुरतिगगनेतरंसूक्ष्मपद्मासोषानालीमधिगतवतीकांचनीमेंद्रनीलीं॥अत्रयोलोसकलेतिसकलनगोचंदन
छन्नदेशोतत्स्थानांसकलनमस्तंसन्निधानात्सुधांशोः॥ ७५॥अत्रवाप्यादिराहेर्नोन्निग्रहतियोनिगीर्णाः॥अत्रातिशयोक्तो
रूपकविशेषणंरूपकेदर्शितानांविधानामिहापिसंभवोस्तीत्यतिदेशेनप्रदर्शनार्थं॥तेनात्रापिनेदातिशयोक्तिरितिद्रविध्यं॥तत्थाप
याधिक्यन्यूनतादिविनागश्चेतिसर्वमनुसंधेयं॥ यथावा॥सुधाबद्ध्यासेरुपवनचकोरेरनुस्तुतः किरन्योस्नामक्षीनवलवलीपा
कप्रणयनी॥उपश्राकाराग्यंप्रणुहिनयनेतर्कयमनागमाकाशेकोयंगलिहारणः शीतकीरणः॥७६॥अत्रकोयंगलितहारणइत्यु
त्प्रासिद्धचद्रोद्देदस्तताउत्कर्षश्चगर्भितः॥एवमन्यत्रापुहनीयं॥यद्यपन्हुतिगर्भेसेवासापन्हवामता॥तत्सूक्तिषुसुधाराज
नूश्रोताःपश्यंतितांविधो॥ ७७॥अत्रतत्सूक्तिमाधुर्यमेवामतमित्यतिशयोक्तिः चंद्रमंउल्लसन्मतंतन्नवतीत्यपन्हुतिगर्भा॥
यथावा॥मुक्ताविद्रुममंतरामधुरसःपुष्पेपरंधूर्वहंश्रालेयद्युतिमंउलेखलुतयोरकासिकानार्णवे॥तच्चोद्वांतिशंखमूर्भिनपुनःपू
त्वलाच्यंतेरतानीमानिविकत्थ्यंतितद्रमयेषांनसादृक्पथे॥ ७८॥अत्राधररसएवमधुरसइत्यतिशयोक्तिः॥पुष्परसोनमधुरसइ
त्यपन्हुतिगर्भा॥अलंकारसर्वस्वतास्वरूपोलेक्षायांसापन्हवलमुक्तं॥यथा॥गतासतीरतिमिधदृनेनससंभ्रमंघोरविलासिनी
षु॥यत्रोल्लसत्फेनततिश्छलेनमुक्ताट्टहासेवविनातिक्षिप्ता॥७९॥ततस्तियानत्रभेदः॥यत्तत्रशुद्धापन्हुतिगर्भत्वं॥यत्रफेनतती
त्वमपन्हुतंतत्रैवाट्टहासलोलेक्षणात्॥इहतुपर्यस्तापन्हुतिगर्भत्वं॥इंदुमंउल्लासवपन्हुतस्यामतादेःसूक्त्यादिषुनिवेशनात्तू
रदंचपर्यस्तापन्हुतिगर्भत्वंउल्लेक्षायामपिसंभवति॥तत्रस्वरूपोलेक्षायां॥यथा॥जानेतिरागादिदमबिंबबिंबस्यचव्यक्तमितं
रधत्वं॥ह्यावैरोधावगमाक्षमाणांनाम्निक्यमोन्मूदनयोर्जनानां॥ ८०॥अत्रप्रसिद्धफलबिंबतामपन्हुत्यातिरागेणनिमित्तेन द
मयंत्यधरेतदुल्लेक्षापर्यस्तापन्हुतिगर्भा॥हेतूल्लेक्षायास्तुदुर्गत्वंप्राग्लिखितंहेतूल्लेक्षोदाहरणेएवदृश्यते॥तत्रह्यंधकारेषुअं
ध्यंहेतुत्वमपन्हुत्यान्यत्रनिवेशितं॥फलोल्लेक्षायांयथा॥रवितप्तोगजःपद्मानूतद्भ्रत्यानूबाधितुंध्रुवं॥रसोविशतिनस्नातुंगजः

स्नानंहिनिष्फलं॥ ८१॥अत्रगजस्यसरःप्रवेशंप्रतिफलस्नानेफलत्वंअपन्हुत्यपद्मबाधनेतन्निवेशितं॥अत्रमनयाप्रसक्तमनु
प्रसक्त्याप्रस्तुतमनुसरामः॥नेदकातिशयोक्तिस्तुतस्यैवान्यस्यवर्णनं॥अन्यदेवागंनीयंमन्यतूद्धेयंमहीपतेः॥ ८२॥अत्रलो
कप्रसिद्धगंनीयाद्यनेदपिनेदावर्णितः॥यथावा॥अन्येयंरूपसंपत्तिरन्यैवदग्धधोरणी॥नेषानलिनपत्राक्षीसृष्टिःसाधा
रणीविधेः॥ ८३॥संबंधातिशयोक्तिःस्यादयोगेयोगकल्पनं॥सौधाग्राणिपुरस्यास्यस्पृशंतिविधुमंडलं॥ ८४॥यथावा॥कति
पयदिवसैःक्षयंप्रायायात्यनकगिरिःकृतवासरावसानः॥इदमुदयमुपयातिचक्रवाकीवितरणशालिनिवीररुद्रदेवे॥ ८५॥अ
त्रचक्रवाक्याःसूर्यास्तमयकारकमहामेरुक्षयसंभवनाप्रयुक्तसंतोषसंबंधेपितसंबंधोवर्णितः॥योगेप्ययोगोसंबंधातिशयो
क्तिरितीयते॥लक्ष्मीरायीराजेंद्रस्यद्युमान्नाद्रियामहे॥ ८६॥अत्रस्वद्युमेघादरसंबंधेपितदसंबंधोवर्णितः॥यथावा॥अनयोरन
वद्यांगिस्तनयोर्नेनमाणयोः॥अवकाशोनपर्याप्तस्तवबाहुलतांतरे॥ ८७॥अत्रमातिशयोक्तिःस्यात्सहत्वेहेतुकार्ययोः॥आलि
र्गतिसमंदेवज्यारात्र्यपरांश्चते॥ ८८॥अत्रमार्ज्यायदारसंधानंतदामीमेवशत्रवःक्षितौपतंतिइतिहेतुकार्ययोःसहत्वंवर्णि
तं॥यथावा॥मुंचतिमुंचतिकोशंनजतिचनजतिप्रकृपमरविर्गः॥तववीरदेवखड्गस्यजतिस्यजतिक्षमामाशु॥ ८९॥अत्रखड्गस्यको
शपरित्यागादिकालेएवारिप्राणांग्रहधनत्यागादिवर्णितः॥चपलातिशयोक्तिःस्योत्कार्यहेतुप्रसक्तिजे॥यस्यामीस्फुरितन्यावल
ग्योनवदूर्मिका॥ ९०॥अत्रनायकप्रवासप्रक्रमाज्ञेणयोषितांतिकार्यंकार्यंकार्यंमुखेनैवप्रदर्शितं॥यथावा॥आहातुंसहसो
ल्लसितंपिकुसुमेहस्ताग्रमालोहितंरक्षारंजनवार्तयापिसहसारक्तंतलंपादयोः॥अंगानामनुलेपनस्मरणमप्यस्तंतखेदावहंहंता
धीरदृशःकिमन्यदलकामोदापिनाराधयेत्॥ ९१॥यथावा॥यामिनयामीतिधवेवदतिपुरस्तात्क्षणेनतन्वंग्याः॥गलितानिपुरोव
लयान्यपराणितथैवदलितानि॥ ९२॥अत्यंतातिशयोक्तिस्तुपौर्वापर्यव्यतिक्रमे॥अग्रेमानोगतःपश्चादनुनीताप्रियेणसा॥ ९३॥
यथावा॥कवीद्राणामसनप्रथमतरमेवागंनजुवः॥सखड्गासंगाकुलकरिमदामोदधुमराः॥अमीपश्चान्नेषामुपरिपतिताःरुद्र
नृपतेःकटाक्षाः॥क्षीरोदप्रसरदुरुवीचीसहचराः॥ ९४॥एतास्तिस्रोप्यतिशयोक्तयःकार्यशीघ्रप्रत्यायनार्थाः॥वर्ण्यानामितरेषा
बाधमेक्यंतुल्ययोगिता॥संकुचंतिसरोजानिस्वैरिणीवदनानिच॥ ९५॥त्वद्गमादेवदृष्टेकस्वचित्तेनन्यासते॥मालतीशरान्छे

स्वकरस्तीनांकठोरता॥९६॥अस्फुटानामप्रस्फुटानांवागुणक्रियारूपैकधर्मान्वयः॥तुल्ययोगिता॥संकुचतीति॥अर्धंप्रस्फुततुल्ययो
गितायामुदाहरणं॥तत्रप्रस्फुतचंद्रोदयकालिकतयावर्णनीयानांसरोजानांप्रकाशनीतेस्तेरिणीवदनानांचसंकोचरूपैकक्रियान्व
योदर्शितः॥उत्तरश्लोकेनायिकासंकुमार्यवर्णनेप्रस्फुतेवर्णनीयानांमालत्यादीनांकठोरतारूपैकगुणान्वयः॥यथावा॥संजात
पत्रप्रकरान्वितानिसमुद्गंतिस्फुटपाटलत्वं॥विकस्वराण्यर्ककराग्निमर्शादिनानिपद्मानिचदृष्टिमीयुः॥९७॥नागेंद्रहस्ता
स्त्रचिकर्कशत्वादिकांतद्रव्यात्कदलीविशेषाः॥लब्ध्वाहिलोकेपरिणाहिरूपंजातास्तदूर्वोरुपमानबाह्याः॥९८॥अत्रग्रीष्म व
र्णनेतदीयत्वेनप्रस्फुतानांदिनानांपद्मानांचैककक्रियान्वयः॥ऊरुवर्णनेप्रस्फुतानांकरिकराणांकदलीनांचैकगुणान्वयः॥हिता
हितेष्टप्तितोल्यमपरातुल्ययोगिता॥अदीयतेपरावृत्तिर्मित्रशात्रवयोस्त्वया॥९९॥अत्रहिताहितयोर्मित्रशात्रवयोरुत्कृष्टवृत्ति
दानस्यपरावदानस्यचश्लेषेणअभेदाध्यवसायादुक्तितोल्यं॥यथावा॥यश्चैनंवंपरशुनायश्चैनंमधुसर्पिषा॥यश्चैनंगंधमा
ल्याद्यैःसर्वस्मैकुरुतेवसः॥१००॥अत्रकश्चतिसंचतिअर्चतिइत्याध्याहारेवाक्यानिपूरणीयानि॥पूर्वोदाहरणंस्फुतिपर्यवसा=
यि॥इदंनिदर्शनपर्यवसायिइतिनेदः॥इयंसरस्वतीकंठाभरणाकृतुल्ययोगिता॥गुणोत्कृष्टेःसमीकृत्यवस्तोन्यातुल्ययोगिता
लोकपालोयमःपाशीश्रीदःशंकोनवानपि॥१॥अत्रवर्णनीयोराजाशंकादिभिर्लोकपालत्वेनसमीकृतः॥यथावा॥संगता
निसर्गाक्षीणातदिद्दीपसितान्यपि॥क्षणदृश्यंनतिष्ठंतिघनारब्धान्यपिस्वयं॥२॥पूर्वत्रस्फुतिरिहतुनिंदा॥इयंकाव्यादर्शेदर्शिता
इमांतुल्ययोगितांसिद्धिरितिकेचिद्व्याकुर्वते॥यदाहुर्जयदेवः सिद्धैःस्याद्तुल्ययोगिनामकीर्त्यैतुल्यतोक्तये॥युवामेवहविरध्वा
तोलंबलंजलधिर्जलैरितिमतांनरेंद्रत्रवक्ष्यमाणंदीपकमेव॥वदंतिवर्ण्यावर्ण्यानांधर्मैक्यंदीपकंबुधाः॥मदेनजातिकलनः
प्रतापेनमहीपतिः॥४॥अस्फुताप्रस्फुतानांसकधर्मान्वयोदीपकं॥यथाकलनरपालयोःप्रस्फुताप्रस्फुतयोर्नक्रियान्वयः॥य
थावा॥मणिःशाणोल्लीढःसमरविजयीहेतिनिहतोमदक्षीणोनागःशरदिसरितःश्यानपुलिनाः॥कलाशेषश्चंद्रःसुरतमृ
दितबालवनितातनिम्नाशानेतगलितविभवाश्चार्थिषुनृपाः॥५॥अत्रप्रस्फुतानांनृपाणांअप्रस्फुतानांचमण्यादीनांशात्रै
क्यधर्मान्वयः॥अस्फुतेकनिष्टःसमानोधर्मःप्रसंगादन्योपकरोति त्रासादार्यमारोपितोदीपःरथ्यायामिवेतिदीपसादृश्यादी

७

319
1995

पकं॥संतायांचेतिइवार्थेकनप्रत्ययःयद्यपिस्फुवर्णबुध्यांछथिवींचिन्वंतिपुरुषास्त्रयः॥शूरश्चकृतविद्यश्चयश्चजानातिसेवितुं॥ध
इत्यत्रप्रस्फुतानामप्रस्फुतांयुगपत्धर्मान्वयःप्रतिभाति॥मदेनजातिकलनः इत्यत्रप्रस्फुतस्यैवप्रथमधर्मान्वयःतथापित्रासां
गिकत्वंनहीयते॥वस्फुतयाप्रस्फुतोदेशेनप्रकृतस्यैववर्णनस्याप्रस्फुतेपिअनयात्॥नहिदीपस्यत्रासादरथ्ययोःयुगपदु
पकारित्वेनजातानर्थेअर्पितस्यसूपस्यातिन्यःप्रथमंपरिवर्षणेनचत्रासंगिकत्वंहीयते॥तुल्ययोगितायांतुएकंप्रस्फुतमन्य
दप्रस्फुतंमितिविशेषाग्रहणात्॥सर्वादेशेनधर्मोक्तिरितिविशेषः॥अयंचानयोरपरोविशेषः॥उभयोरनयोरुपमालंकारस्यग
म्यत्वाविशेषेप्यत्रप्रस्फुतमुपमानंप्रस्फुतमुपमेयमितिव्यवस्थितउपमानोपमेयभावस्तत्रतुविशेषाग्रहणादेकिकइति॥त्रिवि
धंदीपकाष्टनोभवेदाद्यत्तिदीपकं॥वर्षत्यंबुदमालेयंवर्षत्येषाचशर्वरी॥७॥उन्मीलंतिकदंबानिस्फुटंतिकुटजद्रुमाः॥माद्यंति
चातकाःसप्तमाद्यंतिचशिखावलाः॥८॥दीपकस्यानेकोपकारार्थंतयादीपस्थानीयस्यशब्दस्यार्थस्यान्वयोवाआवृत्तिस्त्रिविध
मावृत्तिर्दीपकं॥क्रमेणोदाहरणंवर्षतीत्यादि॥यथावा॥उत्कूजंतिमेघानांमालावर्गेकलापिनां॥यूनांचोत्कूजंत्यश्चमानसंस
रश्चजः॥९॥रामयतिजलधाराचातकयूनांतृषंचिरोपनतां॥क्षपयतिवधूलोचनजलधाराकामिनांप्रवासरुचिं॥१०॥वदनेन
निर्जितंतवनिलीयतेचंद्रबिंबमबुधरे॥अरविंदमपिसंदरिनिलीयतेपाथसांपूरे॥११॥एवंचाष्टानांनांप्रस्फुताप्रस्फुतोन्नयवि
धिषयत्वान्नावृत्तिर्दीपकच्छायापत्तिमानेणदीपकव्यपदेशः॥वाक्ययोरेकसामान्येप्रतिवस्तूपमामता॥तापेनच्याजतेसूरःशूरः
श्चोपनराजते॥१२॥यत्रोपमानोपमेयपरवाक्ययोरेकःसाधारणोधर्मःपृथग्निर्दिश्यतेसाप्रतिवस्तूपमाप्रतिवस्तूप्रतिवाक्यार्थ
उपमासमानधर्मोस्यामितिव्युत्पत्तेः॥यथात्रैवच्याजतेराजतेइत्येकएवधर्मउपमोपमेयवाक्ययोःपृथक्निर्दिष्टपदान्यानिर्दिष्टः
यथावा॥स्थिरस्नेहोलीगुणवतीखलबुध्यानवाध्यते॥रत्नदीपस्यहिशिखावात्ययापिननाश्यते॥१३॥यथावा॥तवामृतस्यंदिनि
पादकंपजेनिवेशितात्माकथमन्यदिच्छति॥स्थितेरविंदमकरंदनिर्भरेमधुव्रतोनेक्षुरसंहिवीक्षते॥१४॥अत्रयद्यपिउपमेयवा
क्यमनिष्ठंउपमानवाक्यंश्रवीप्सातिधर्मनिर्देशःप्रतिभातितथापिवीक्षणमात्रस्यवर्जनीयस्यप्रतिषेधानर्हत्वादिच्छापूर्वकवी
क्षाप्रतिषेधोयमनिष्ठापर्यवसितएवेतिधर्मैक्यमनुसंधेयं॥अर्थापत्तिःप्रस्फुतानामप्रस्फुतानांवा॥प्रतिवस्तूपमातुप्रस्फुताप्र

स्कृतानामितिविरोधः अयंचापरोविरोधः ॥आदृतिदीपकेवधर्म्येणनन्वतिप्रतिवस्तूपमातुवैधर्म्येणापिदृश्यते॥यथावा॥विद्वानेव विजानातिविद्वज्जनपरिश्रमं॥नहिवंध्याविजानातिगुर्वीप्रसववेदनां॥१५॥यदिसतिगुणाःपुंसांविकसंत्येवतस्यय॥नहिकरिकरामोदःशपथेनविज्ञाप्यते॥१६॥चेत्प्रतिबिंबप्रतिबिंबत्वंदृष्टांतस्तदलंकृतिः॥त्वमेवकीर्तिमानराजन्विधुरवहिकीर्तिमान्॥१७॥ यत्रोपमानोपमेयवाक्ययोर्भिन्नावेवधर्मौबिंबप्रतिबिंबभावेननिर्दिष्टौतत्रदृष्टांतः॥त्वमेवकीर्तिमानित्यत्रकीर्तिकांत्योर्बिंबप्रतिबिंबभावः॥यथावा॥कामंन्दृपाःसंतिसहस्रशोन्येराजन्वतीमाहुरनेनभूमिं॥नक्षत्रतारागृहसंकुलापिज्योतिष्मतीचंद्रमसैवरात्रिः॥१८॥यथावा॥देवीवाचमुपासतेहिबहवःसारंतुसारस्वतंजानीतेनितरामसौगुरुकुलक्लिष्टोमुरारिःकविः॥अब्धिर्लंघितएववानरभटैःकिंतस्यगांभीरतामायातात्रनिमग्नपीवरतनुर्जानातिमंथाचलः॥१९॥नन्वत्रोपमानोपमेयवाक्ययोर्भेदेनसामराधस्तत्रावधिपर्यंतसमेकोधर्मइतिप्रतिवस्तूपमायामुक्तं॥मैवं॥अचेतनेमंथाचलेज्ञानस्यबाधित्वेनतत्रज्ञानातिइत्यनेनसामराधस्तत्रावधिपर्यंतसमस्यैवोपात्तत्वात्॥अत्रोदाहरणेयदादृतिदीपकाद्विशेषः॥पूर्ववत्प्रस्तुतविषयत्वप्रस्तुतोद्रष्टव्यः॥वैधर्म्येणाप्ययंदृश्यते॥रुतंचगर्वान्निमुखेमनस्व्यया किमन्यदेवंनिहताश्वविद्विषः॥तमांसितिष्ठंतिहितावदृश्यमोनयावदायात्युदयाद्विभोःप्रिया॥२०॥वाक्यार्थयोःसदृशयोरक्योरोपोनिदर्शना॥यद्दातुःसाम्यतासेयंपूर्णेदोरकलंकता॥२१॥अत्रदातृपुरुषसोम्यत्वस्योपमेयवाक्यार्थस्यपूर्णेदोरकलंकत्वस्योपमानवाक्यार्थस्यचयत्नाभ्यामेक्यारोपः॥यथावा॥अरण्यरुदितंरुतंशवशरीरमुद्दर्तितंस्वलंनीलंबुजन्मनः॥२३॥अत्रनेत्रयुगलेनीलांबुजगतलीलापदार्थारोपोनिदर्शना॥यथावा॥वियोगोगोऽनारीणांयोगःपतत्रिणां॥ पांडिमा॥अदृश्यतसखर्जूरीगंडेरपासुच॥२८॥पूर्वस्मिंस्तुदाहरणेउपमेयेउपमाधर्मारोपः॥इहतूपमानेउपमेयधर्मारोपइति भेदः॥उभयत्राप्यन्यधर्मस्यान्यत्रासंभवेनतत्सदृशधर्मास्पदोपन्यासपर्यवसानंतुल्यं॥इयंपदार्थहेतुर्निदर्शनालक्षितोपमेति जयदेवेनव्याहृता॥यद्यपिवियोगोगोऽनारीणामितिश्लोकः प्राचीनैर्वाक्यार्थहेतुर्निदर्शनायामुदाहृतस्तथापिविशिष्टोधर्म

६

321
1995

र्मिणोरेक्यारोपोवाक्यार्थहेतुर्निदर्शना॥उपमानोपमेययोरन्यतरस्मिन्नन्यतरधर्मारोपः॥पदार्थहेतुर्निदर्शनेतिव्यवस्थामाश्रित्यास्माभिरयमिहोदाहृतःएवंच॥त्वयिसतिशिवादातर्यस्मदन्यर्थितानामितरमनुसरंतोदर्शयंतोर्थिमुद्रां॥चरमचरणपातैर्दुग्धहृद्दाग्धुकामाःकरंनमनुसरामःकामधेनोस्थितायां॥२५॥दोर्भ्यांमध्यंतितीर्षेतस्तुष्टुवुःस्वांगुणार्णवं॥इत्यादिषुवाक्येनदानावेषिवाक्यार्थहेतुरेवनिदर्शना॥विशिष्टयोरेक्यारोपसद्भावात्॥वाक्यार्थयोःसदृशयोरितिलक्षणवाक्येवाक्यार्थशब्देनबिंबप्रतिबिंबभावापन्नवस्तुविशिष्टयोःप्रस्तुताप्रस्तुतधर्मेणैवविवक्षितत्वात्॥एवंच॥राजसेवामनुष्याणामसिधारायलेहनं॥पंचाननपरिष्वंगोव्यालीवदनचुंबनमित्यत्रप्रस्तुताप्रस्तुतहेतोस्तयोरेकपरोपात्तेपिवाक्यार्थनिदर्शनायांनक्षतिस्तयोर्बिंबप्रतिबिंबभावापन्नवस्तुविशिष्टव्यापाररूपत्वात्॥अतएवनिदर्शनायांरूपकवद्भेदः॥रूपकेहिअविशिष्टयोरेवमुखचंद्राधिक्योरेक्यारोपः॥अंघ्रीदंडोहरेरूर्ध्वमुक्षिप्तोबलिरोधने॥विधिविष्टरपद्मस्यनालदंडोमुदेस्तुवः॥२६॥इतिविशिष्टरूपकोदाहरणेपिनबिंबप्रतिबिंबभावापन्नवस्तु॥विशिष्टताविधातृविष्टरकमलश्लिष्टत्वरूपसाधारणधर्मवत्तासंपादनार्थमेवतत्रविशेषणोपादानात्॥यद्दातुःसाम्यतेत्यादिनिदर्शनोदाहरणेदातृपूर्णेंदुद्वयादीनामानंदकरत्वादिनैवान्यविशेषणयोर्बिंबप्रतिबिंबभावान्नावान्नावात्॥यत्रतुविषयविषयिविशेषणानांपरस्परसादृश्यनबिंबप्रतिबिंबभावोस्ति॥ज्योत्स्नानस्मधुरणधवलाविभ्रतीतारकास्त्वीन्यंतर्धौनव्यसनरसिकारात्रिकापालिकीयं॥द्वीपान्द्वीपंभ्रमतीदधतीचंद्रमद्वांकपालेन्यस्तंसिध्यंजनपरिमलंलांछनस्यछलेनेति २७॥सावयवरूपकोदाहरणेतत्रापिविषयविषयिणोस्तद्विशेषणानांचप्रत्येकमेवैक्यारोपः॥नतुज्योत्स्नादिविशिष्टरात्रिरूपविषयस्यनस्मादिविशिष्टशिवकापालिकीरूपविषयिणश्चविशिष्टरूपणैक्यारोपोस्तितस्माद्राजसेवामनुष्याणामित्यादावपिवाक्यार्थहेतुर्निदर्शनेतियुक्तं॥मतांतरेत्विहपदार्थहेत्वेवनिदर्शनयानाद्यं॥अपरंबोधनंप्राहुरक्रियायासदसदर्थयोः॥नश्येद्राजविरोधीतिक्षीणंचद्रोदयेतमः॥२९॥उदयन्नेवसवितापन्नेघपर्यंतिश्रियं॥विज्ञापयन्सतांद्वीनांफलंसृष्टेरनुग्रहः॥२९॥कस्यचित्किंचित्क्रिययाविशिष्टस्यस्वक्रिययापरान्प्रत्यसतःसतोवाथस्यबोधनंयत्रिबध्यतेतदपरांनिदर्शनामाहुः॥सदर्थबोधनेउत्तरार्धमुदाहरणं॥तत्रनश्येदितिबोधयतिवक्तुंबोधयदित्यस्यगम्यमानत्वादप्रयोगः॥ततश्चराज्ञाचंद्रेणसहविरुद्धस्वयंनाशक्रियया

विशिष्टतमः स्वकीयनाशक्रियया दृष्टान्तभूतया अन्येषामेवंप्रकारविरूढ्यैन्नश्येदित्यनिष्टपर्यवसायिनमर्थं बोधयदेव नष्टमितिनि
बधनादसदर्थनिदर्शना॥तथोत्तरश्लोके सवितास्तोदयसमसमयमेवप्रभुलक्ष्मीमादधानः॥तयापप्रभुलक्ष्म्याधानक्रियया
परानुत्रतिसदृशीनांफलंसूचयन्नयहएवतिश्रेयस्करमर्थं बोधयन्निवबद्धइतिसदर्थनिदर्शनायथावा॥उन्नतंपदमवाप्यये
लघुहेतवोध्वसपतेरितिध्रुवं॥शैलशेखरगतःदृषद्गुणश्चारुमारुतधृतःपतत्यधः॥३७॥अत्रगिरिशेखरगतोदृषद्गुण
णोमंदमारुतप्रेरणापिकंपितःपतन्लघोरून्नतदृष्टापतनहेतुरिति॥असदर्थं बोधयन्निबद्धइति॥असदर्थनिदर्शना॥चू
डामणिपदधतेयोयोदर्वरविमागतं॥सतीकायातिथयीतिबोधयन्गृहमेधिनः॥३९॥अत्रसमागतंरविंशिरसासंभावयन्सदर्थ
चलःस्वनिष्ठयारविधारणक्रिययासमागतानांसतांएवंगृहमेधिन्यतिथ्यंकार्य्यमितिसदर्थंबोधयन्निबध्नातिसदर्थनिदर्श
ना॥अत्रकेचिद्वाक्यार्थहेतुपदार्थहेतुनिदर्शनाहृदयंअसंभवबस्तुहृदसंबंधनिबंधनमितितृतीयातुसंभवद्वस्तुसंबंधनिबंधने
तिचव्यवहरंति॥तथाहि॥आद्यनिदर्शनायांवाक्यार्थयोरैक्यमसंभवतयोःसाम्यपर्यवस्यति॥द्वितीयनिदर्शनायामपिअन्य
धर्मोन्यत्रासंभवात्॥धर्मिणोःसाम्यिपर्यवस्यति॥तृतीयनिदर्शनायांतुस्वक्रिययापरानुत्रतिसदृसदर्थबोधनसंभवदेवसम
तांगन्नीकरोति॥बोधयन्गृहमेधिनइत्यादिकारीषाग्निरध्यापयतीतिवत्॥समर्थीचरणेणिच्प्रयोगः॥ततश्चयथाकारि
षाग्निःशीतापनयनेनवटूनध्ययनसमर्थानूकरोति॥एवंवर्ण्यमानःपर्वतःस्वयमुपमानभावेनगृहमेधिनउक्तबोधनस
मर्थानूकर्तुंक्षमतेयथायंपर्वतः॥समागतंरविंशिरसासंभावयति॥एवंगृहमेधीसमागतंसंतमुचितपूजयासंभावयेदिति॥
अतःसंभवतिबोधनसंबधइति॥व्यतिरेकोविशेषश्चेदुपमानोपमेययोः॥शैलाइवोन्नताःसंतःकिंतुप्रह्वतिकोमलाः॥३२॥
अयमुपमेयाधिक्यपर्यवसायीव्यतिरेकः॥यथावा॥रक्तस्त्वंनवपल्लवैरहमपिश्लाघ्यैःप्रियायागुणै
स्त्वंमायातिशिखीमुखाःस्मरधनुर्मुक्ताःपुनर्मामपि॥पल्लवतःकुसुमतोरेषविशेषःकस्यतेवीर॥भूषयतिकर्णमेकःपरस्तुकर्णेतिरस्करोते॥३३॥कांता
पादतलाहतिस्तवमुदेतदून्नमाप्यावयोःसर्वतुल्यमशोककेवलमहंधात्रासशोकःकृतः॥३४॥अनुनयपर्यवसायीयथा॥ दृ
ढतरनिबद्धमुष्टेःकोशनिषण्णस्यसहजमानिनस्य॥कृपणस्यकृपाणस्यचकेवलमाकरोनेदः॥सहोक्तिःसहभावश्चेद्ध

323
1795

सतेजनरंजनः॥दिगंतमगमत्तस्यकीर्तिःप्रत्यर्थिभिःसह॥३५॥यथावा॥छायासंश्रयतेतलंविटपिनांश्रांतेवपांथैःसमंमूलं
मूलंयातिसरोजलस्यजडतास्वानेवमीनैःसह॥आचामत्यहिमांशुदीधितिरपस्तेनवलोकैःसमंनिद्रागन्नंगृहंसहप्रविशति
कांतेवकांताजनैः॥३७॥जनरंजनइत्युक्तेःअनेनसार्धंविहरंबुरांशेरित्यादीनसहोक्तिरलंकारः॥विनोक्तिश्चेद्विनाकिंचि
त्प्रस्तुतंहीनमुच्यते॥विद्याद्यापिसावद्यविनाविनयसंपदं॥३८॥यथावा॥यश्चरामंनपश्येत्तुयंचरामोनपश्यति॥निंदितः
सनवेद्धोकस्वात्मापनंविगर्हते॥३९॥अत्ररामदर्शनंविनानिंदितत्वंविनाशब्दमंतरेणापिदर्शितुं॥तच्चेत्किंचिद्विनाराम्यंवि
नोक्तिःसापिकथ्यते॥विनाखलेविनात्येषाराजेंद्रनवतःसना॥४०॥यथावा॥आविर्भूतेशशिनितमसामुच्यमानेवरात्रि
शस्यार्चिर्हुतभुजइवस्निग्धभूयिष्ठधूमा॥मोहनतर्वरतनुरियंलक्ष्यतेमुक्तकल्पागंगारोधःपतनकलुषागृह्णतीवप्रसादं
॥४१॥अत्रतमःप्रभृतीनिविनानिशादीनांरम्यत्वंविनाशब्दमंतरेणदर्शितं॥समासोक्तिःपरिस्फूर्तिःप्रस्तुतेप्रस्तुतस्यचेत्॥
अयमद्रीमुखंपश्यरक्तश्चंद्रतिचंद्रमाः॥४२॥यत्रप्रस्तुतवृत्तांतेवर्ण्यमानेविशेषणसाम्यबलादप्रस्तुतवृत्तांतस्यापिपरिस्फूर्ति
स्तत्रसमासोक्तिरलंकारः॥समासेनसंक्षेपेणप्रस्तुताप्रस्तुतवृत्तांतयोर्वचनात्॥उदाहरणमयमेंदीति॥अत्रचद्रस्यप्रौढी
प्रारंभसंबंधलक्षणोदयेवर्ण्यमानेमुखराद्रस्यप्रारंभवदनसाधारण्यात्॥रक्तशब्दस्यारुणकामुकसाधारण्याच्चंबती
त्यस्यप्रस्तुतार्थसंबंधमात्रपरस्यरात्र्यर्थांतरसाधारण्याच्चद्रमःशब्दगतपुंल्लिंगनेंदीगतस्त्रीलिंगेचनतत्प्रतिपाद्यद्रसंब
धिनेनचापरस्तादप्रस्तुतपरवनितासक्तपुरुषवृत्तांतःप्रतीयते॥यथावा॥व्यालंबकुचभारमाकुलकचंव्यालोलहारावलि
प्रेखत्कुंडलशोभिगंडयुगलंप्रस्वेदिवक्त्रांबुजं॥राश्वद्दत्तकरप्रहारमधिकश्वासंरसादेतयायस्मैदुःसादरंसृगया
संसक्तेतत्सती॥४३॥अत्रकंदुकवृत्तांतेवर्ण्यमानेव्यालंबकुचभारमित्यादिक्रियाविशेषणसाम्याद्विपरीतरतासक्तनायि
कावृत्तांतःप्रतीयते॥पूर्वत्रविशेषणानिश्लिष्टानिइहसाधारणानीतिभेदः॥सारूप्यादपिसमासोक्तिरुच्यतेयथा॥पुरायत्रस्रोतः
पुलिनमधुनातत्सरितोविपर्यासंयातोघनविरलभावःक्षितिरहो॥बहोर्दृष्टंकालादपरमिवमन्येवनमिदं॥निवेशःशैलानां
तदिदमितिबुद्धिंद्रढयति॥४४॥अत्रवनवर्णनेप्रस्तुतेतत्साधारणकूटिंविषुधनसतां।नादिसंभूयसंभूयिविपर्यासंप्राप्त

स्यत्समाश्रयस्यग्रामनगरादेर्दृष्टांतः प्रतीयते॥ अत्रविशेषणसाम्यात्सारूप्याद्वायदप्रस्तुतदृष्टांतस्य प्रस्तायनंतत्सदृशेविशेष्यत
समारोपार्थंसर्वथैव प्रस्तुतानन्वयिनःकविसंरंभगोचरत्वायोगात्॥ ततश्चसमासोक्तावप्रस्तुतव्यवहारसमारोपश्चारुताहेतुः नतु
रूपकइवप्रस्तुते प्रस्तुतरूपसमारोपोप्यस्तिमुखचंद्रइत्यत्रमुखेचंद्रत्वारोपहेतुचंद्रपदसन्निध्याहारवद्दृष्टश्रुतिचंद्रमाइत्या
दिसमासोक्तयुदाहरणचंद्रादेर्जारत्वाद्यारोपहेतोस्तद्वाचकपदसन्निध्याहारस्याभावात्॥ निरीक्ष्यविद्युन्नयनैःपयोदोमुखंनि
शायामन्निसारिकायाः॥ धारानिपातैःसहकिंनुवांतश्चंद्रोयमित्यार्तंतरंरासा॥४५॥ इत्यादौकदेशविवर्तिरूपकोदाहरणइवप्र
स्तुते प्रस्तुतरूपसमारोपगम्यस्याप्यभावात्॥ तत्रहिविद्युन्नयनैरित्यत्रनिरीक्षणानुगुण्यादुत्तरपदार्थंप्रधानमयूरव्यंसकादि
समासव्यवस्थितोउत्तरपदार्थंप्रधानभूतनयनान्वयानुरोधात्॥ पयोदेनुक्तमपिद्रष्टुपुरस्तात्तारोपणंगम्यमुपगम्यते॥ नचेह
तथानिरीक्षणवत्॥ त्वय्यागतेकिमितिवेपतएषसिंधुरितिश्लोकेसेतुरुत्लाद्विच्चाप्रस्तुतासाधारणदृष्टांतउपात्तोस्ति॥ना
पिश्लिष्टसाधारणादिविशेषणसमर्पितयोःप्रस्तुताप्रस्तुतदृष्टांतयोरप्रस्तुतदृष्टांतस्यापिविद्युन्नयनवत्प्राधान्यमस्ति॥ येन
तदनुरोधत्वंसेतुमंथरइत्यत्रेवचानुक्तमपिप्रस्तुतेऽप्रस्तुतरूपसमारोपमन्युपगच्छेमतस्माद्विशेषणसमर्पिताप्रस्तुतव्य
वहारसमारोप्यमात्रमिहचारुताहेतुः॥ यद्यपिप्रस्तुताप्रस्तुतदृष्टांतयोरिहश्लिष्टसाधारणविशेषणसमर्पितयोःभिन्न
पदोपात्तविशेषणपातयोरिवविशेष्येणवसाक्षादन्वयादस्तिसमप्राधान्यं॥ तथाप्यप्रस्तुतदृष्टांतान्वयानुरोधात्नप्रस्तुतप्र
स्तुतसमारोपांगीकार्यः॥ तथाहि॥ यथाप्रस्तुतविशेष्येनास्यप्रस्तुतदृष्टांतस्यान्वययोग्यता॥ तथैवाप्रस्तुतजारादेर्नास्ति प्र
स्तुतदृष्टांतस्यान्वययोग्यता॥ एवंचसमप्रधानयोःप्रस्तुताप्रस्तुतदृष्टांतयोरन्यतरस्यावश्यंकसमारोपेऽन्युपगंतव्यस्तुतएव
प्रस्तुते प्रस्तुतदृष्टांतस्यारोपश्चारुताहेतुरितियुक्तं॥ नन्वेवंसतिविशेषणसाम्यादप्रस्तुतस्यगम्यत्वेसमासोक्तिः॥ विशेषणानां
साम्येनयत्रप्रस्तुतवर्त्तिनां॥ अप्रस्तुतस्यगम्यत्वंसासमासोक्तिरिष्यते॥ इत्यादीनिप्राचीनानांसमासोक्तिलक्षणानिनसंग
छेरन्॥ प्रस्तुतेश्लिष्टसाधारणादिविशेषणसमर्पितानुरागपूर्वकवदनचुंबनाद्यप्रस्तुतदृष्टांतसमारोपमात्रस्यचारुताहेतुत्व
लाभ्युपगमेनविशेषणसाम्यकृतकामुकाद्यप्रस्तुतधर्मिव्यंजनानपेक्षणादितिचेत्॥ उच्यते॥ स्वरूपतोप्रस्तुतदृष्टांतस्यारो

345
1995

पोनचारुताहेतुः॥ किंत्वप्रस्तुतकामुकादिसंबंधित्वेनावगम्यमानस्यतस्यरोपः॥ तथाभूतस्यैवरसानुगुणत्वात्॥ नचतावदवगम
नेविशेषणपदानांसामर्थ्यमस्ति॥ अतःश्लेषादिमहिम्नाविशेषणपदैःस्वरूपितःसमर्पितेनवदनचुंबनादीनांतत्संबंधिनि
कामुकादावन्वयेपुनस्तदीयत्वानुसंधानेतन्नभवतियथास्वरूपतोदृष्टेनराजाश्वादिनातत्संबंधिनिराजादौस्मारितेपुन
रश्वादौतदीयत्वानुसंधानवदितिविशेषणसाम्येनवाच्योपस्कारकस्याप्रस्तुतव्यंजनस्याक्षेपे॥ अतएवश्लिष्टविशेषणाया
मिवसाधारणविशेषणायामपिअप्रस्तुतव्यवहारसमारोपइत्येवप्राचीनानांप्रवादःकंदुकेव्याचलत्कुचभारत्वादिविशिष्ट
वनितासंबंधित्वस्यकामुकसंबंधित्वेनैवसमारोपणीयत्वात्॥ स्वरूपतःकंदुकेपतितस्यसत्वेनासमारोपणीयत्वात्॥ किंचसारूप्यनिब
धनत्वेनोदाहृतायांसमासोक्तावप्रस्तुतदृष्टांतस्याश्वार्थस्याप्रस्तुतदृष्टांतरूपेणैवगम्यतयातेनरूपेणतस्यसमारोपसिद्धेर
न्यत्रापितथैवयुक्तमेवप्राचीनानांलक्षणमितिविभावनीयं॥ अलंकारःपरिकरःसान्निध्येविशेषणे॥ सुधांशुकलितोनंसस्ता
पंहरतुवःशिवः॥ ४६॥ अत्रसुधांशुकलितोनंसइतिविशेषणंतापहरणसामर्थ्यान्निध्यं॥ यथा॥ तवप्रसादात्कुसुमायुधो
पिसहायमेकंमधुमेवलब्ध्वा॥ कुर्योहरस्यापिपिनाकपाणेर्धैर्यच्युतिंकेममधन्विनोन्ये॥ ४७॥ अत्रपिनाकपाणेरिति हरविशेष
णंकुसुमायुधइत्यर्थलब्धाहमर्थविशेषणंचसारासारयुक्तत्वान्निध्यरूपं॥ यथावा॥ सर्वाशुचिनिधानस्यकृतघ्नस्यविनाशि
नः॥ शरीरकस्यापिकृतेमूढाःपापानिकुर्वते॥ ४८॥ अत्रशरीरविशेषणानितस्यहेयत्वेनासंरक्षणीयत्वान्निध्यानि॥ य
थावा॥ व्यासेनेकतयास्थितेऽकृतिगणेजन्मीनवल्मीकतोनानौनाभवमच्युतस्यसुमहद्ध्यंचनानाविधं॥ चित्रार्थोनरहस्य
थामचकथंसूत्रामणिनासंगुरुर्देवलदुर्वासाश्चंदवर्णनमहंकुर्यांकथंवाकुयां॥ ४९॥ अत्राकृतिगणंनव्यास्छमित्यादीनिविशेष
णानिस्वस्मिन्व्यासाद्यसाधारणकार्यकरणप्रतिषेधमुखेननाहंव्यासइत्याद्यन्निध्यानि॥ तत्राद्योदाहरणयोरेकैकंविशेषणं
समनंतरयोःप्रत्येकंबहूनिविशेषणानि॥ तत्रापिप्रथमोदाहरणेसर्वाणिविशेषणान्येकान्निध्यानिपदार्थरूपाणिच
द्वितीयोदाहरणेभिन्नान्निध्यानिवाक्यार्थरूपाणिचेतिभेदः॥ तेषुव्यंग्यार्थसद्भावेपिध्वनिव्यपदेशः॥ हरस्यतापहर
णेमन्मथस्यैकमुतिकन्यायेनसर्वधन्विधैर्यनंजकत्वेशरीरसंरक्षणार्थेयापमाचरतांमूढत्वेस्वस्यवर्णनीयत्वेजगुणकथना

रात्कत्वेचवाच्यएवोपस्कारकत्वादतएवव्यंग्यार्थस्यवाच्यपरिकल्पासरिकरइतिनामास्यालंकारस्य॥केचित्तुनिश्रयोजनवि
विशेषणोपादानेपुष्टार्थदोषस्यात्कत्वात्सश्रयोजनत्वंविशेषणस्यदोषाभावमात्रेणकश्चिदलंकारःएकनिष्ठतादृशानेकविशे
षणोपन्यासःपरंवैचित्र्यविशेषासरिकरइत्यलंकारमध्येपरिगणितइत्याहुःवस्तुतस्त्वनेकविशेषणोपन्यासएवपरिकर
इतिननियमः॥श्लेषयमकादिपुष्टार्थदोषाभावेनतत्रैकस्यापिविशेषणस्यसान्निध्यायस्यविन्यासेविधिनिविशेषसङ्गा
सरिकरत्वोपपत्तेः॥यथा॥अतियंजेतनिजांयादेवतामुन्नयतश्चवेतऋषतेपथे॥क्षितिच्छतेवसदेवतकावयंनवतानवताकिम
हिदुहा॥५०॥अत्रपुरहूतपूजायुक्तान्दादीनप्रतिभगवतःकृष्णस्यवाक्यंगोवर्धनगिरिरवास्माकंरक्षकत्वेनदेवतमितिसएव
पूजनीयःनारक्षकःपुरंदूतइत्येवपरंवनवतेतिगोवर्धनगिरिर्विशेषणंकाननत्वांनिर्झरादिमत्वाच्चपुष्पफलमूलतृणजलादिभि
रारण्यकानामस्माकंअस्मच्छब्दानांचगवामयमेवरक्षकइत्यभिप्रायगर्भे॥एवमन्त्रैकस्यापिसाभिप्रायविशेषणस्यापिविधिनि
विशेषवशादलंकारत्वसिद्धावन्यत्रापिसूधांशुकलितोन्नतइत्यादौतस्यात्मलाभोननिवार्यते॥अपिच॥एकपदार्थहेतुकंकाव्य
लिंगमलंकारइतिसर्वसंमतं॥तद्वदेकस्यापिविशेषणस्यसान्निध्यस्यालंकारत्वंकृतमेव॥सान्निध्येविशेष्यतुनवेसरिकरोकु
रः॥चतुर्णांपुरुषार्थानांदातादेवश्चतुर्भुजः॥५१॥अत्रचतुर्भुजइतिविशेष्यंयुगपत्पुरुषार्थचतुष्टयदानसामर्थ्यान्निध्यायग
र्भं॥यथावा॥फणीद्रस्तेगुणानूवुंलिखितुंहेहयाधिपः॥द्रष्टुमाखंडलःसाक्षात्कोहमेषक्षतेगुणाः॥५२॥फणीद्रइत्या
दिविशेष्यपदानिसहस्रमुखत्वाद्यभिप्रायगर्भाणि॥नानार्थसंश्रयःश्लेषोवर्ण्यावर्ण्योभयाश्रयः॥सर्वोमाधवःपायात्सयो
गंगामदीधरत्॥५३॥अलेनत्वन्मुखेवेतुत्वंहरिणाहितसत्क्रिया॥उच्चरद्भिर्कीर्तात्मःशुशुभेवाहिनीपतिः॥५४॥अनेका
र्थशब्दविन्यासःश्लेषःसत्रिविधः॥प्रस्तावैकविषयः॥अप्रस्तावैकविषयः॥अप्रस्ताप्रस्तावैकविषयश्च॥सर्वेद्याद्यानां
क्रमेणोदाहरणानि॥तत्रसर्वोमाधवइतिस्तोतव्येनप्रस्तुतयोःहरिहरयोःकीर्तनंप्रस्तुतश्लेषः॥अजंकमलंअजश्चंद्रस्त
योरयमानमात्रेणाप्रस्तुतयोःकीर्तनमित्यप्रस्तुतश्लेषः॥यथावा॥ततःकाकोदरोयेनद्राग्धापिकरुणात्मना॥पूतनामारणे
ख्यातःसमेस्तुशरणंविभुः॥५५॥नीतानामाकुलीभावंखुब्धेनूरिशिलीमुखैः॥सदृशोवनदृष्टानांकमलानांत्वदीक्षणे॥५६

321
1995

असावुदयमारूढःकांतिमान्रक्तमंडलः॥राजाहरतिलोकस्यहृदयंमृदुभिःकरैः॥५७॥अत्राद्येस्तोतव्येनप्रस्तुतयोःकृष्ण
मयोःश्लेषः॥द्वितीयेउपमानत्वेनाप्रस्तुतयोःपद्महरिणयोःश्लेषः॥तृतीयेरागवर्णनप्रस्तावेप्रस्तुतस्यप्रत्यग्रोदितचंद्रस्याप्रस्तु
स्यनवाभिषिक्तस्यनृपतेःश्लेषः॥यदत्रप्रस्तुताप्रस्तुतश्लेषोदाहरणेशब्दशक्तिमूलध्वनिमिच्छंतिआचार्याः॥तत्रप्रस्तुताप्रस्तुताभिध
धानमूलकस्योपमादेरलंकारस्यव्यंग्यत्वान्नायंनत्वप्रस्तुतार्थस्यैवव्यंग्यत्वान्नायमप्रस्तुतार्थस्यापिशक्त्याप्रतिपाद्यस्या
भिधेयत्वावश्यंभावेनव्यक्त्यनपेक्षितत्वात्॥यद्यपिप्रस्तुतार्थप्रकरणबलात्झटितिबुद्धिस्थितेसत्येवपश्चान्नपतद्वा
धनादिवाचिनोराजकरादिपदानामन्योन्यसंनिधानबलात्तत्तद्विषयशक्त्यंतरान्मेषपूर्वकमप्रस्तुतार्थःस्फुरेत्॥नैतावतातस्य
व्यंग्यत्वंशक्त्याप्रतिपाद्यमानसर्वथैवव्यक्त्यनपेक्षणात्॥पर्यवसितेप्रस्तुतार्थाभिधानेपश्चात्स्फुरतिचेत्काकांगूढश्लेषोभव
त्वस्तिचान्यत्रापिगूढश्लेषः॥यथा॥अयमपिजरठःप्रकामगुर्वीरुन्नघविलंबिपयोधरोपरूढाः॥सततमसकृन्मतागम्यरूपा
परिणतदिक्करिकास्तटीर्विनर्ति॥५८॥मंदमग्निमधुरर्योपलादर्शितश्चयथुश्चाभवत्तमः॥दृष्टयस्तिमिरजंसिषेविरेशोषमो
षधिपतेरसन्निधौ॥५९॥अत्रहिसमासोक्त्युदाहरणयोःप्राकरणिकार्थप्रकरणबलात्झटितिबुद्धिस्थेविशेषणसाम्यादप्रस्तु
तोपिरूढेरस्तोतव्यादिः॥प्रतीयते॥तत्रसमासोक्तेरंगश्लेषइतिसर्वेषामभिमतएव॥एवमन्यत्रापिगूढश्लेषध्वनिबुद्धिर्न
कार्या॥यथा॥रम्याइतिप्राप्तवतीःपतत्कारागंविविक्ताइतिवर्धयंतीः॥यस्यामेसेवतनमद्वलीकाःसमंवधूभिर्वलिभिर्युवानः॥
६०॥अत्रद्वितीयांतादिविशेषणसमर्पितार्थांतराणांशब्दसामर्थ्येनवधूभिरन्वयः॥विभक्तिभेदात्॥नचविभक्तिभेदेपितद
न्वयासपक्षंसाधर्म्यमिहनिबध्यमस्ति॥यतएतस्मिन्धिकपयःश्रियंवहंत्यःसंक्षोभंवनकृद्भावनीताः॥वाल्मिकेर
रहितरामलक्ष्मणानांसाधर्म्यंदधतिगिरांमहासरस्यः॥६१॥इत्यत्रवाक्यश्लेषोभवेत्॥समभिव्याहृतक्रियाविशेषणंसहा
र्थंतेनाप्युपपन्नंवधूप्रभृतिशब्दविशेषणार्थान्वयात्॥आकूद्रागप्रतीतेःसामर्थ्यंनावलंबतेतस्मादर्थसौंदर्यबलादेवतदन्वयानुसं
धानमितिगूढश्लेषः॥तदनुतद्भावेसमशब्दस्यसाधर्म्यार्थत्वकल्पनमितिवाच्यंतेवोपमालंकारस्यांगमयंश्लेषइत्यलंइति
प्रपंचेन॥तत्सिद्धंश्लेषत्रैविध्यं॥एवंचश्लेषःप्रकारांतरेणापिद्विविधःसंपन्नः॥उदाहरणगतेघनश्यामकीलालवाहिनीत्यादिषु

परस्परविलक्षणंपदनंगमनपेक्ष्य॥नानार्थक्रोडीकारादनंगश्लेषः॥सर्वेहोमाधवोयोगंगांहरिणाहितसन्निनेत्यादिषुपरस्परंविल
क्षणंपदनंगमनपेक्ष्यनानार्थक्रोडीकारात्सनंगश्लेषइति॥तत्रनंगश्लेषशब्दालंकारःअनंगश्लेषस्त्वर्थालंकारइतिकेचित्॥उन
यमपिशब्दालंकारइत्यन्ये॥उभयमप्यर्थालंकारइतिसन्निप्रायः॥एतद्विवेचयितुंनिश्चमीमांसायांद्रष्टव्यं॥अप्रस्तुतप्रशं सा
स्यात्सायत्रप्रस्तुताश्रया॥एकःक्षतिशंकुंतेषुयोन्यंशाक्रान्तयाचते॥६२॥यत्राप्रस्तुतउक्तांतवर्णनेनप्रस्तुतावगतिपर्यवसायि
तत्रप्रस्तुतप्रशंसालंकारः॥अप्रस्तुतउक्तांतवर्णनेनप्रस्तुतावगतिश्चप्रस्तुताप्रस्तुतसंबंधेसतिनवतिसंबंधश्चसारूप्यं
सामान्यविशेषभावः॥कार्याकार्यकारणभावोवासंभवति॥तत्रसामान्यविशेषभावेसामान्याद्विशेषस्यविशेषात्सामान्यावग
तोद्वैविध्यं॥कार्याकार्यकारणभावेपिकार्यात्कारणस्यकारणाद्वाकार्यस्यावगतोद्वैविध्यं॥सारूप्येतुकोनेदृश्यस्याःसंचप्रकारा
यदाहुःकार्येनिमित्तेसामान्यविशेषेप्रस्तुतेसतितदन्यस्यवचःस्तुत्यैतुल्यस्येतिचपंचधेति॥तत्रसारूप्यनिबंधनाप्रस्तुतप्र
शंसोदाहरणंएकःक्षतीति॥अत्राप्रस्तुतस्यचातकस्यप्रशंसाप्रशंसनीयत्वेनप्रस्तुतेतत्सरूपेक्षुद्रेभ्योयाचनान्निवृत्तेमानिमा
निनिपर्यवस्यति॥यथावा॥अबलक्षत्रियमसदाजटिलांसन्निधिरारोपितोमृगपतेःपदवीयदिच्छा॥मत्तेभकुंभदलनेपटुनापिलु
ब्धस्यानादरंकरिष्यतिकथंहरिणाधिपस्य॥६३॥अत्रक्षुद्रकस्यनिंदानिंद्नीयत्वेनप्रस्तुतेतत्सरूपेक्षत्रियंप्रतिव्यवहारमात्रेण
विद्वत्तामन्निनयतिवेधयेपर्यवस्यति॥यथावा॥अंतश्छिद्राणिभूयांसिकंटकाबहवोबहिः॥कथंकमलनालस्यमाभूवन्नि
र्गुणागुणाः॥६४॥अत्रकमलनालस्तुतौतत्कीर्त्तनंतत्सरूपेबहिःखलेषुजाग्रत्सूच्यादिपुत्रादिभिरंतःकलहंकुर्वाणेपर्य
वस्यति॥एवंचलक्ष्यलक्षणयोःप्रशंसादृष्टःस्तुतिनिंदास्वरूपाख्यानसाधारणकीर्त्तनमात्रपरोद्रष्टव्यः॥सामान्यनिबंधना
यथा॥विधायवैरंसामर्षैर्नरोरायेउदासते॥अक्षिप्योदर्चिषंकक्ष्येशरतेतेनिमारुते॥६५॥अत्रप्रागेवसामर्षैःशिशुपालेरु
क्मिणिहरणादिनावैरंदृढीकृतवताकृष्णेनतस्मिन्नुदासितुमयुक्तमितिविशेषार्थंवक्तव्येप्रस्तुतेतत्प्रत्यायनार्थंसामान्यमभि
हितं॥यथावासौहार्दसंरंभावाप्तमुच्चावचभिटाजुषां॥परोक्षमितिकोप्यस्तिपरीक्षानिकषोपलः॥६६॥अत्रयदिदं प्र
त्यक्षइवपरोक्षेपिममहितमाचरासितदात्मनुत्तमस्कृहरितिविशेषवक्तव्येनप्रस्तुतेसामान्यमभिहितं॥विशेषनिबंधनायथा

१२॥

३२१
१९९५

अंकाधिरोपितमृगश्चंद्रमामृगलांछनः॥कसरीनिष्ठुरक्षिप्तमृगयूथोमृगाधिपः॥६७॥अत्रक्षत्रंप्रतिबलभद्रवाक्येमार्दव
दूषणपरे॥पूर्वंप्रस्तावानुसारेणक्रूरएकख्यातिभाग्भवति॥नतुमृदुरितिसामान्येवक्तव्यतत्प्रत्यायनार्थंमप्रस्तुतोविशेषोभिहि
तः॥एवंचक्षत्रियादिषुसामान्यतःकिंचिदर्थंप्रस्तुत्यतद्विवरणार्थेंप्रप्रस्तुतकथाविशेषोदाहरणेधियमेवाप्रस्तुतप्रशंसाद्र
ष्टव्या॥कारणनिबंधनायथा॥हृतसारमिवेंदुमंडलंदमयंतीवदनायवेधसा॥क्षतमध्यविलंबिलोक्यतेध्रुतगंभीरखनी॥
लिमा॥६८॥अत्राप्राकरणिकेंदुमंडलगततयोल्लक्ष्यमाणेनदमयंतीवदननिर्माणार्थंसारांशाहरणेनकारणेनतत्कार्यरूपो
वर्णनीयतयाप्रस्तुतोदमयंतीवदनगतोलोकोत्तरसौंदर्यविशेषःप्रतीयते॥यथावा॥मदीयवरदराजस्तवे॥आश्चित्यनूनम
मृतंकृतयःपदंतेदृक्षयोपनतदिव्यपदानिमुख्याः॥लावण्यपुंजन्यनिचयंसुहृदिलदास्येविन्यस्ययांतिमिहिरंप्रतिमास
मिन्नाः॥६९॥अत्रप्राकरणिकंचंद्रगततयोल्लक्ष्यमाणेनलावण्यपुण्यनिचयविन्यासेनकारणेनतत्कार्यमनंतकोटिचंद्रलाव
ण्यशालित्वमनन्यसुखसाधारणंभगवन्मुखेवर्णनीयतयाप्रस्तुतंप्रतीयते॥तथाहि॥चंद्रस्तावन्मंत्रलिंगात्सुधिक्षयाच्चां नेराध्यवसायाद्वाप्रतिमासनिम्नत्वेनवर्णितस्तेनानीताश्चंद्राअनंतकोटयइतिलेख्यंकालस्यानादित्वात्॥सर्वेषांचते
षांमाकाराश्रयणश्लेषमहिम्नाभगवच्चरणसमाश्रयेणाध्यवसितंभवगच्चरणप्रपन्नानांचदेहक्षयोपस्थितौपरमपद
प्राप्त्यभिमुख्यंतदानीमेवस्वसुहृद्गोस्वकीयसुकृतसोमनिवेशनं॥ततःसूर्यमंडलप्राप्तिश्चेत्येतत्सर्वंश्रुतिसिद्धमितित
दनुरोधेनतेषांदेहक्षयकालस्यामावास्यारूपस्योपस्थितौसूर्यमंडलप्राप्तेःप्राक्प्रत्यक्षसिद्धेपुण्यलेननिरूपितस्यलावण्य
स्यप्रहाणंनिमित्तीकृत्यतस्यचंद्रसादृश्यस्वरूपोपचरितंतत्सोहार्दवतीभगवन्मुखेन्यसनमुल्लक्षितं॥यद्यपिस्वसुहृद्दुःखे ता
संबंधेसंबंधवर्णनरूपातिशयोक्तिरस्तिइतिशंकानिरस्ता॥तथासतिकस्त्रोकथयामीत्यादयितत्प्रसंगात्॥सारूप्यनिबंधन
प्रस्तुतवाक्यावगतिरूपविछित्तिविशेषणालंकारांतरात्प्रकृत्यनंतिहापितुल्यं॥तस्मात्सर्वोलंकारविलक्षणमिदंललितं
यथावा॥कसूर्यप्रभवोवंशःकचाल्पविषयामति॥तितीर्षुर्दुस्तरंमोहादुडुपेनास्मिसागरं॥५२॥अत्रापिनिदर्शनाव्यो
तिर्नकार्या॥ईदृश्यामत्यासूर्यवंशावर्णयितुमिछुरहमितिप्रस्तुतार्थानुपन्यासात्प्रतिबिंबभूतस्योडुपेनसागरंतितीर्षुरस्मी
त्यप्रस्तुतार्थवर्णनादरोविषमालंकारविन्यासेनचकेवलंतात्पर्यस्यगम्यमानत्वात्॥यथावा॥अनायिदेशःकृतमस्त्वयाः
धवसंतमुत्कस्यदृशांवनस्य॥त्वदाप्तसंकेततयास्तताश्रुश्चाप्यपिनानेनजनेनसंज्ञा॥५३॥अत्रकृतमादेशस्त्वयापरित्य
क्तइतिप्रस्तुतार्थमनुपन्यस्यवसंतमुत्कवनस्यदृशामनायीतितत्प्रतिबिंबभूतार्थमात्रोपन्यासाल्ललितालंकारः॥उत्कंठि
तार्थसंसिद्धिर्विनायत्नंअहर्षणं॥तामेवध्यायतेतस्मैविस्रष्टासेवदूतिका॥५४॥उत्कंठादछाविशेषः॥सर्वैयस्यरसास्तादो
यत्रास्तीत्यभिमन्यते॥तत्प्राप्तीछासंसक्त्योमुत्कंठांकवयोविदुरित्युत्कलक्षणातद्विषयस्यार्थस्यतदुपायसंपादनयत्नंविना
सिद्धिरहर्षणं॥उदाहरणंस्पष्टं॥यथावा॥मधेमदुरमंबरंवनभुवःश्यामास्तमालद्रुमैर्नक्तंभीरुरयंत्वमेवतदिमाराधेगृहंप्रा
पय॥इत्थंनंदनिदेशतश्चलितयोःप्रत्यध्वकुंजद्रुमंराधामाधवयोर्जयंतियमुनाकूलेरहःकेलयः॥५५॥अत्रराधामाधव

योःपरस्परमुत्कंठितलंघ्रसिद्धतरंअग्रेचग्रंथकारेणनिबध्नमिस्यनोदाहरणेलक्षणानुगतिः॥वांछितार्थकार्थस्यसंसिद्धिस्त्रश्च
हर्षणं॥दीपमुद्योतयेद्यावन्नाबद्ध्युदितोरविः॥५६॥स्पष्टं॥चातकस्त्रिचतुरान्पयःकणान्याचतेजलधरंपिपासया॥सोपिपू
रयतिविश्वमंबसाहंतहंतमहतामुदारता॥५७॥यत्नादुपायसिध्यर्थांसाक्षाज्ज्ञानःफलस्यच॥निध्यंजनौषधीमूलंखननद्यासा
धितोनिधिः॥फलोपायसिध्यर्थांयत्नान्मध्येउपायसिद्धिमनपेक्ष्यसाक्षात्फलस्यैवलाभोपिप्रहर्षणं॥यथानिध्यंजनसिध्य
र्थंमूलिकोखनतः तत्रैवनिधेर्लाभः॥यथावा॥उज्झित्वाप्रथममधःस्थितंमृगाक्षीपुष्पोर्ध्वस्थितविटपंगृहीतुकामा॥आ
रोढुंपदमधादशोकयष्टावामूलंपुरनपितेनपुष्पिताभूत्॥५९॥अत्रपुष्पग्रहणोपायभूतारोहसिध्यर्थांसदनिधानानत्रै
वपुष्पग्रहणलाभः॥इष्यमाणविरूद्धार्थसंप्राप्तिस्तद्विषादनं॥दीपमुद्योतयेद्यावन्निर्वाणस्तावदेवसः॥६०॥यथावा॥रात्रि
र्गमिष्यतिभविष्यतिसुप्रातंभास्वानुदेष्यतिहसिष्यतिपंकजश्रीः॥इत्थंविचिंतयतिकोशगतेद्विरेफेहाहंतहंतनलिनीग
जउज्जहार॥६१॥एकस्यगुणदोषाभ्यामुद्भासोन्मस्यतौयदि॥अपिमाणवयेत्साध्वीस्तालेतीछतिजाह्नवी॥६२॥काठिण्य
कुचयोःस्रष्टुंवांछयःपादपद्मयोः॥निंदतिविश्वधातारंत्वांधरियोषितः॥६३॥तद्भाग्यंधनस्येवयज्जाश्रयतिसज्जनं
लाजोयमेवंभूतालसेवकानांनचेदृधः॥६४॥यत्रकस्यचिद्गुणेनान्यस्यगुणः॥दोषेणदोषोगुणेनदोषोदोषेणगुणोवा॥
यद्दूर्व्यतेसउल्लासः॥द्वितीयार्धमांयस्योदाहरणं॥तत्रपतिव्रतामहिमगुणेनतत्स्नानतोगंगायाःयावन्नूत्नगुणोवर्णितः
द्वितीयश्लोकेद्वितीयस्योदाहरणं॥अत्रराज्ञोधाटिषुवनेपलायमानानामरियोषितांपयोधोवनपरिषंथिसारदोषणतयोः
काठिन्यमस्रष्टुश्चार्थेकुचयोःस्रष्टवतोधातुर्निंद्यत्वदोषोवर्णितः॥तृतीयश्लोकेतृतीयचतुर्थयोरुदाहरणं॥तत्रसज्जनम
हिमगुणेनधनस्यतदनाश्रयणंदोषत्वेनरागतः॥क्रीयंदोषणतत्सेवकानांबंधंविनानिर्गमनंगुणत्वेनवर्णितं॥अनेनैवक्र
मेणोदाहरणांतराणि॥यथावा॥यदयंरथसंक्षोभादंसेनांसोनिषीदितः॥एकःकृतीमदंगेषुरोषमंगेष्वजोनरः॥६५॥अ
त्रनायिकासौंदर्यगुणेनतदंसनिषीदितस्यस्रंसस्यकृतित्वगुणोवर्णितः॥लोकानंदनचंदनद्रुमसखेमास्मिन्वनेस्त्रीय
तांदुर्वारोरकठिनैरसारहृदयैराक्रांतमेतद्वनं॥तेह्यन्योन्यविघर्षजातदहनज्वालावलीसंकुलानस्यान्येवकुलानिकेवलमि
दंसर्वंदहेयुर्दृढं॥६६॥अत्रवेणूनांपरस्परसंघर्षसंजातदहनसंकुलत्वदोषेणवननाशरूपोदोषोवर्णितः॥दानार्थिनोमधु

355
1995

करायरिकर्णतालेदूरीकृताःकरिवरेणमदांधबुध्या॥तस्यैवगंडयुगमंडलहासिरेषाभृंगाःपुनर्विकचपद्मवनेचरंति॥
६७॥अत्रभ्रमराणामलंकरणत्वगुणेनगजस्यतत्प्रतिक्षेपोदोषत्वेनवर्णितः॥आघ्रातंपरिचुंबितंपरिमृदितंपुन
श्चर्वितंसर्वंवाक्विनीरसेनमनसातत्रत्यथांसाकृथाः॥हंसद्वंद्वतवैतदेवकुशलंयद्वोत्तरेणादंसदंतःसारविचारणव्यस
निनाचूर्णीकृतंयन्मना॥६८॥अत्रवानरस्यचापलदोषेणरत्नस्यचूर्णनाभावोगुणत्वेनवर्णितः॥अत्रप्रथमचतुर्थयो
रुल्लासोन्वर्थः॥मध्यमयोश्छत्रिन्यायेनलक्षणिकः॥तान्यांतोयदिनस्योतामवज्ञालंकृतिस्तदा॥स्वल्पमेवांबुलब्धेप्रस्थं
प्राप्यापिसागरं॥६९॥मीलंतियदिपद्मानिकाहानिरमृतद्युतेः॥तान्यांगुणदोषान्यांतोगुणदोषोअत्रकस्यचिद्गुणेनअ
न्यस्यगुणलाभोद्वितीयार्धयामुदाहरणं॥दोषेणदोषस्याप्राप्तोतृतीयार्धे॥यथावा॥मदुक्तिश्चेदंतर्दमयतिसुधीभूयसुधियः
किमस्मानामस्मादलसपुरुषानादरभरैः॥यथायूनस्तद्वत्परमरमणीयापिरमणीकुमाराणामंतःकरणहरणंनैवकुरुते॥
७०॥लंघेःसंस्तरसेक्षणेनलघुताकानामदिग्दंतिनाभ्यालेःकंकणभूषणानिकुरुषेहानिर्नहेम्नामपि॥मूर्ध्न्यंकुरुषेसि
तांशुमयराःकिंनामलोकत्रयीदीपस्यांबुजबांधवस्यजगतामीशोसिकिंभ्रमहे॥७१॥अत्राद्येकवितारमणीगुणान्या म्
रसबालहृदयोल्लासरूपगुणाभावोवर्णितः॥दोषस्याऽन्यर्थनानुज्ञातत्रैवगुणदर्शनात्॥विपदःसंतुनःशश्वत्यत्रसंकीर्त्ये
तेहरौ॥७२॥यथावा॥मय्यकृतीर्णतांयातुतयस्योपकृतंहरे॥नरःस्मृपकाराक्षीपविन्नमन्निकाक्षति॥७३॥इयंहनुम
तंप्रतिराघवस्योक्तिः॥अत्रप्रत्युपकाराभावोदोषः॥तदभ्युपगमेहेतुर्गुणोविपक्षाकांक्षायांअप्रसक्तिः॥साचव्यतिरे
कमुखप्रयत्नेनसामन्येनविशेषसमर्थनरूपेणार्थांतरन्यासेनदर्शिता॥यथावा॥अजेमभवदंतिकंप्रकृतिमेयपैशाचिकीकि
मस्यमरसंपदः प्रथमनाथनाथामहे॥भवद्भवनदेहलीविकटदंतुदंडाहतिस्फुटन्मुकुटकोटिभिर्मघवदादिभिर्भूयते॥
७४॥लेशःस्यादोषगुणयोर्गुणदोषत्वकल्पनं॥अखिलेषुविहंगेषुहंतस्वेच्छंदचारिषु॥शुकपंजरबंधस्तेमधुराणांगिरां
फलं॥७५॥दोषस्यगुणत्वकल्पनंगुणस्यदोषत्वकल्पनंचलेशः॥राज्ञोबहुमतेविदुषिपुत्रेचिरंराजधान्यांप्रवसतिनद्
रीनोत्कंठितस्यगेहेस्थितस्यपितुर्वचनमप्रस्तुतप्रशंसारूपं॥तत्रप्रथमार्धेइतरविहंगानामवस्तुत्वंदोषस्यस्वच्छंदचरणा
नुकूलतयागुणत्वेकल्पितं॥द्वितीयार्धेमधुरजातिरूपगुणस्यपंजरबंधहेतुतयादोषत्वेकल्पितं॥नचात्रव्याजस्तुतिरा

शंकनीया॥ नन्वत्रविहंगांतराणांस्तुत्याजेननिंदायोस्तुकस्यनिंदाव्याजेनस्तोचतासर्वंकिंतुपुत्रदर्शनोत्कंठितस्यदोषगुण
योर्गुणत्वदोषत्वान्निमोनएवालंश्लोकेनिबध्नः॥यथावा॥संतःसाचरितोदयव्यसनिनःप्रादुर्भवंत्यंबणाःसर्वत्रैवजनापवाद
चकिताजीवंतिदुःखंसदा॥अन्युत्पन्नमतिःस्तेननसतानैवासताव्याकुलोयत्नायुक्तविवेकशून्याहृदयोधन्योजनःप्रस्त
तः॥७६॥ इंदीवरश्रोदाजहार॥युवेषगुणवान्राजायोग्यस्त्रेपतिरूर्जितः॥रणोत्सवेमनःसक्तंयस्यकामोत्सवादपि॥७७
चपलोनिर्दयश्चासौजनःकिंतेनमेसखि॥आगःप्रमार्जनायैवचाटवोयेनशिक्षिताः॥७८॥अत्राश्वस्योक्तरोत्तरंवीर्योत्सि
क्तस्तुतिःकंन्यायानिरंतरसंभोगोनिर्विविक्तोदोषत्वेनप्रतिज्ञासतामित्यभिप्रेत्यविदग्धमासख्याराजकोपपरिजिहीर्षया
सएवदोषोगुणत्वेनवर्णितः॥उन्नरश्लोकेसखीन्विरूपदृष्टमानंकर्तुमशक्तायापितासामग्रतोमानपरिग्रहानुगुणंप्रतिः
ज्ञायतदनिर्वाहमाशंकमानयासखीनामुपहासंपरिजिहीर्षयानायिकयातस्यचाटुकारितागुणएवदोषत्वेनवर्णितः॥न
चाश्वश्लोकेस्तुतिर्निंदापर्यवसायिनी॥द्वितीयश्लोकेनिंदास्तुतिपर्यवसायिनीतिव्याजस्तुतिराशंकनीया॥राजप्रकोपा
दिपरिहारार्थंमिहनिंदास्तुत्योरन्योन्यंविदितंलेशतएवोद्घाटनेनततोविशेषादिति॥वस्तुतस्त्विहव्याजस्तुतिसद्भावेपिनदोषः॥
नह्येतावतालेशमात्रस्यव्याजस्तुत्यंतर्भावः॥प्रसज्यतेतदसंकीर्णयोरपिलेशोदाहरणत्वोर्दर्शितत्वात्॥नापिव्याजस्तुतिमा
त्रस्यलेशांतर्भावः प्रसज्यते॥निन्हवविषयव्याजस्तुत्युदाहरणेषुकस्तवानररामराजभवनेलेखार्थसंवाहकोयदूक्षुमु
हुरीक्षसेनधनिनांभ्रूषेनचाटून्मधुपेत्यादिषुदोषगुणीकरणस्यगुणदोषीकरणस्यचान्यत्वात्॥तत्रान्यगुणदोषाभ्यामन्यत्र
गुणदोषयोःप्रतीतेः॥विषयेक्वेपि॥इंदोर्लक्ष्मनिपुरजयिनःकंठमूलंमुरारिर्दिङ्नागानांमदजलमषीनोजिगंडस्थलानि॥
आद्यापुंधीवरवयतिलकश्यामलिप्तान्यालिप्तान्यासतेवदधबलितंकिंयशोनिस्तुतीयैः॥७९॥इत्याद्युदाहरणे
ष्वलेशास्पर्शनात्॥अन्येंदुलक्ष्मादिधवलीकरणाभावदोषएवगुणत्वेनपर्यवस्यति॥किंतुपरिसंख्यारूपेणतत्तन्मतंधव
लितमित्यन्योगुणःप्रतीयते॥क्वचिद्व्याजस्तुत्युदाहरणेगुणदोषीकरणस्त्वेषिस्तुतेर्विषयोतरमपिदृश्यते॥यथावा॥सर्व
दासर्वदोसीतिमिथ्यासंस्तूयसेबुधैः॥नारयोलेभिरेरंतुंनवक्षःपरियोषितः॥८०॥अत्रहिवाक्यानिंदयापरिसंख्यारूपे
णततोन्यत्सर्वमभिमतमर्थिनोदीयतइतिस्तुत्यंतरमपिप्रतीयते॥एवंचयेषूदाहरणेषुकस्तेशौर्यमदोयोश्वमित्यादि

357
1995

षुगुणदोषीकरणादिकमेवव्याजस्तुतिरूपतयावतिष्ठते॥तत्रलेशाद्व्याजस्तुत्योःसंकरोयथा॥दृश्यमेवहिव्याजस्तुत्यप्रस्तुत
प्रशंसयोरपिप्राक्संकरोदर्शितः॥सूच्यार्थसूचनंमुद्राप्रस्तुतार्थपरैःपदैः॥निर्तवगुर्वीतरुणीदृग्युग्मंविपुलाचसा॥८१
अत्रनायिकावर्णनपरेणदृग्युग्मविपुलापदेनास्यानुष्टुपः॥विपुलानामत्वरूपसूच्यार्थसूचनंमुद्रा॥यद्यप्यत्रग्रंथेदृस
नाम्नोक्तिसूचनीयत्वं॥तथाप्यस्योत्तरार्धस्यलक्ष्यलक्षणयुक्तत्वंदर्शयन्॥शास्त्रमध्यपतितत्वेनतस्यसूचनीयत्वमस्तीतितर
न्निप्रायेणलक्षणंयोज्यं॥एवंरत्नमालायांतत्तद्रत्ननामनिर्देशेनतत्तन्नामकुरुविंदादिकसूचनं॥नक्षत्रादिमालायाः
मग्निदेवतानामनिर्देशत्रसूचनमित्यादावयमेवालंकारः॥एवंनाटकेषुवक्ष्यमाणार्थसूचनेषुपि॥क्रमिकंप्रस्तुतार्थानो
न्यासंरत्नावलीविदुः॥चतुरास्यःपतिर्लक्ष्म्याःसर्वज्ञस्त्वंमहीपते॥८२॥अत्रचतुरास्यादिपदेवर्णनीयस्यप्रस्तुतविष्णुद्वा
रकनापिप्रतीयतइतिप्रसिद्धसहपाठानांप्रस्तादीनांक्रमेणनिर्देशनंरत्नावली॥यथावा॥स्त्यानश्रियःलांछनेकठिनतावासे
रसालिंगितेप्रस्तादिकरसैकमादुपचितेभ्रूभ्रुवस्त्वापहे॥कोकस्यधिनिनोगभाजिजनितानंदेखलीनोन्मुखेभ्रांतिश्री
रमणावतारदशकंबालेभवत्याःस्तने॥८३॥यथावा॥नीलाभानोनयनयुगलद्राघिमादत्तपत्रंकुंभावेनोकुचपरिक
रःपूर्वंपक्षीचकार॥भ्रूविन्यासोतिमदनधनुषाविभ्रमान्वादृजूल्लासाराधररुचंदूषयामासयस्याः॥८४॥अत्र
पत्रदानपूर्वंपक्षोपन्यासानुवाददूषणोद्भावनानिबुधजनप्रसिद्धक्रमेणन्यस्तानि॥प्रसिद्धसहपाठानांप्रसिद्धक्रमाननु
सरणेप्ययमेवालंकारः॥यथा॥यस्यवह्निमयोहृदयेषुजलमयोलोचनपुटेषुमारुतमयःश्वसितेषुक्षमामयोंगेषुआ
कारामयः॥स्रोतेषुपंचमहाभूतमयोमूर्त्वाहरेमतनिहंतप्रतिसामंतांततःपुरेषुप्रतापः॥८५॥एवमष्टलोकपालन
ग्रहादीनांप्रसिद्धसहपाठानांयथाक्रमंचिंत्यस्तोपमानोपरंजकतादिप्रकारेणनिबंधनेरत्नावल्यलंकारः॥प्रस्तुतान्व
यंविनाक्रमिकतत्तन्नाम्नोक्षेपंन्यायनिबंधनेप्ययमेवालंकारः॥तद्गुणःस्वगुणत्यागादन्यद्दीयगुणग्रहः॥पद्मरागायते
नासामौक्तिकंतेधरत्विषा॥८६॥यथावा॥वीरत्वद्रिपुरमणीपरिधानेपक्षवानिसंस्तूयहरतिवनन्नुविनिजकररुहख
चितानिपदुपत्नधिया॥८७॥पुनःस्वगुणसंप्राप्तिःपूर्वरूपमुदाहृतं॥हरकंठंशुनीलोपिशोषस्तवयशासितः॥८८॥

यथावा॥ विन्यस्तवर्णागरुजाग्रजेनसूर्यस्यरथ्याःपरितःस्फुरंत्याः॥ रत्नैःपुनर्यत्नरचारुचंक्रामानिन्यिरेवंशकरीरनीलैः॥ ९९॥
अयमेवतद्गुणइतिकेचित्त्याजदुः॥ पूर्ववस्तानुरक्तिश्चविरक्तेसतुवस्तुनि॥ दीपेनिर्वापितेप्यासीत्कांचीरत्नेमहन्महः॥॥
१००॥ लक्षणचकारात्पूर्वरूपमिति लक्षणवाचकपदानुरक्तिः॥ यथावा॥ हारंरवद्भिरिवरक्तवहिरपिश्रस्तिनगंडगंजैरतः
कंचुकिभिर्लसन्मणिधरैरध्यासितानूमयः॥ आक्रांतंमहिषीभिरेवशयनंत्यद्विद्विषांमंदिरंराजन्सेवचिरंप्रणयिनीभू
न्यपिराज्यस्थितिः॥ १०१॥ संगतान्यगुणानंगीकारमाहुरतद्गुणं॥ चिरंरागिणिमच्चित्तेनहितोपिनरज्यसि॥ १०२॥ यथावा॥
गंडाभोगविहरतिमदैःपछलेदिग्गजानांवैरिस्त्रीणांनयनकमलेष्वंजनानिम्रमार्ष्टि॥ यच्चप्येषाहिमकरकरा हैतसोवस्ति
कीर्तेकीर्तिर्दिक्षुस्फुरतितदपिश्रीनृसिंहक्षितींद्र॥ १०३॥ ननुचान्यगुणेनान्यगुणोदयानुरूपान्यामुक्तासावज्रालंकारा
न्यांतद्गुणातद्गुणयोःकोभेदः॥ उच्यते॥ उक्तासावज्रालक्षणयोःपुनर्गुणशब्दोदोषप्रतिपक्षवाची॥ अन्यगुणेनान्यगुणोदय
तइत्युदाहृतोनतस्यवगुणस्यसंक्रमणासंक्रमणे॥ किंतुसद्गुरूपदेशेनसरसच्छिष्योज्ञानोसम्यनुसन्निवतद्गुणजन्यत्वेनसं
भावितयोगुणांतरयोरसत्यनुसन्धौ॥ तद्गुणातद्गुणयोःपुनर्गुणशब्दोरूपरसगंधादिगुणवाची॥ तत्रान्यदीयगुणग्रहणाद्यह
णेचरत्नस्फटिकवस्त्रमालिन्यादिन्यायेनान्यदीयगुणेनवरंजनारंजनेविवक्षिते॥ तथैवचोदाहरणानिदर्शितानि॥ यद्यथ
वाज्ञातस्तुतिरतद्गुणश्चविशेषोक्तिर्विशेषोवेत॥ कार्यजनिर्विशेषोक्तिः सतिपुष्कलकारणेइतितत्सामान्यलक्षणाक्रांतत्वा
त्॥ तथाप्युक्तासतद्गुणप्रतिद्वंद्विनाविशेषाकारणालंकारांतरयापरिगणितावितिज्ञेयं॥ प्राक्सिद्धस्वगुणोत्कर्षानुगुणपरसं
निधेः॥ नीलोत्पलानिदधतेकटाक्षैरतिनीलतां॥ १०४॥ यथावा॥ कपिरपिचकापिशायनमधुदमत्तोरश्चिकेनसंदष्टः॥
अपिचपिशाचग्रस्तःकिंब्रूमोवेरूपतंतस्य॥ १०५॥ अत्रकपिलजात्यास्वतःसिद्धस्यवैरूपतस्यमद्यसेवादिरूपत्वेनोक्तिः॥ मीलितं
यदिसादृश्याद्वैरूप्यंवनवक्ष्यते॥ रसोनालक्षितलक्षायाश्चरणेसहजारुणे॥ १०६॥ यथावा॥ मल्लिकामाल्यहारिण्यःसर्वांगीणा
श्चंदनाः॥ क्षौमवस्त्रोनलक्ष्यंतेज्योत्स्नायामभिसारिकाः॥ १०७॥ अत्राद्येचरणालक्तकरसयोरणिमगुणसाम्याद्वैरानध्यवसायः॥
द्वितीयोदाहरणचंद्रिकाभिसारिकाणांधवलिमगुणसाम्याद्वैरानध्यवसायः॥ सामान्यंयदिसादृश्याद्विशेषो

नोपलक्ष्यते॥ पद्माकरप्रविष्टानांमुखेनालक्षितस्फुटे॥ १०८॥ यथावा॥ रत्नस्तंभेषुसंक्रांतप्रतिबिंबशतेक्षणैः॥ लेकेश्वरःस
भामध्येनज्ञातोवालिसूनुना॥ १०९॥ मिलितालंकारेणैकेनापरस्यभिन्नस्वरूपावभासेपिव्यावर्तकविशेषोनोपलक्ष्यतइति
भेदः॥ मीलितोदाहरणेचरणादेर्वस्त्वंतरत्वेनागंतुकयावकादिनावभासते॥ सामान्योदाहरणेतुपद्मानांमुखानांचव्यक्तयं त
रयाज्ञानमस्त्येव॥ तथारावणस्यतत्प्रतिबिंबानांचकिंत्विदंपद्ममिदंमुखमयंबिंबोयंप्रतिबिंबइतिविशेषः॥ यदंनोपलक्ष्य
ते॥ अतएवभेदतिरोधानान्मीलितं॥ तदतिरोधानेपिसाम्येनव्यावर्तकानवभासेसामान्यमित्यनयोरव्यवस्था॥ केचिद्
रूढ्यस्यलक्षणसाम्यात्तयोः केचिद्रूढीयसातदन्यस्वरूपतिरोधानेमीलितं॥ स्वरूपप्रतीतावपिगुणसाम्याद्भेदतिरोधा
नेसामान्यं॥ एवंच॥ अपांगतरंगितदृशोतरलवक्रवर्णागिरोविलासन्नरमंथरागतिरतीवकोतंमुखं॥ इतिस्फुरितमंगकै
रदृशांस्वतोलीलयातदत्रनमदोदयः स्तनपदोपिसंलक्ष्यते॥ ४००॥ इत्यनमीलितालंकारः॥ अत्रदृगंतरत्वादीनांनारीव
पुषःसहजधर्मत्वात्मदोदयकार्यत्वाच्च॥ तदुभयसाधारण्यादुत्प्रेक्षातारत्वादियोगिनावपुषामदोदयस्यस्वरूपमेवतिरो
धीयतेलिंगसाधारण्येनतज्ज्ञानोपायाभावान्मल्लिकामाल्यहारिण्यादिषुतुसामान्यालंकारइत्याहुः॥ तन्मतेपद्माकर
प्रविष्टानामित्यादौभेदाध्यवसायेपिव्यावर्तकास्फुरणेनालंकारांतरेणज्ञाप्यं॥ सामान्यालंकारावांतरभेदेनवा॥ पूर्वस्मिन्म
तेस्वरूपतिरोधानेनालंकारांतरेणज्ञाप्यं॥ मीलितावांतरभेदेनवा॥ भेदविशेषोक्तयोः॥ स्फुटोन्मीलितविशेषोक्तौ॥ हेमाद्रि
तयशोमरुत्सराःशीतेनजानंते॥ लक्षितान्युदितेचंद्रेयानिचमुखानि॥ १॥ मीलितान्यायेनभेदानध्यवसायेयत्रतेकुतोपि
हेतोर्भेदस्फुटोमीलितप्रतिद्वंद्व्युन्मीलितं॥ तथासामान्यरीत्याविशेषास्फुरणेप्राप्तेकुतश्चित्कारणाद्विशेषस्फूर्तौतत्प्रति
द्वंद्वीविशेषकः॥ क्रमेणोदाहरणद्वयं॥ तद्गुणरीत्यापिभेदानध्यवसावप्राप्तउन्मीलितेदृश्यतेयथा॥ नृत्यद्भृंगादृहासत्रसर
सहचरेस्रावकीनेर्यशोनिर्धावत्स्वेनीयमानेत्रिजगतिपरितः श्रीनृसिंहक्षितींद्र॥ नेदृग्यद्येषनाभीकमलपरिमलैरा
दिमासादयिष्यद्देवानांनाभविष्यत्कथमपिकमलाकामुकस्यावबोधः॥ २॥ काकः श्लक्ष्णःपिकः श्लक्ष्णःकोभेदःपिककाक

कयोः॥ यमंतकालेसंप्राप्ते काकः काकः पिकः पिकः॥३॥इदंविशेषकस्योदाहरणांतरं॥ अत्राहितीयोकाकपिकशब्दौ काकत्वेन
ज्ञातःपिकत्वेनज्ञातइत्यर्थांतरंसंक्रमितवाच्यौ॥यथावा॥ वाराणसीवासवतांजनानांसाधारणेशंकरलांछनेपि॥पार्थप्रहारव्रण
मुन्नमांगेप्राचीनमीशंप्रकटीकरोति॥४॥किंचिदाकूतसहितंस्याद्भूदोत्तरमुत्तरं॥यत्रासौवेतसीपांथतन्वंयंसरितरासरित्॥५॥
सरित्तरणमार्गेष्टच्छंतंपांथंप्रतिकामयमानायाउत्तरमिदं॥वेतसीकुंजेत्याच्छंद्यमित्याकूतंयथावा॥ग्रामेस्मिन्प्रस्तरग्रामे न
किंचित्पांथविद्यते॥पयोधरोन्नतंदृष्ट्वावस्त्रमिच्छसिचेद्वस॥६॥आस्तरणादिकंकामयमानंप्रत्युक्तिरियं॥अविदग्धजनग्रा
येस्मिन्ग्रामेचक्वचिदिदमवगम्यतांत्वयेतादृशंप्रतिबंधंकंकिंचिदपिनास्तीतिहृदयं॥इदमुन्नेयप्रश्नोत्तरस्योदाहरणं॥
निबद्धप्रश्नमुत्तरंयथा॥कुशलंतस्याजीवतिकुशलंदृष्टामिजीवतीत्यत्र॥पुनरपितंदेवकथयसिमृतांनुकथयामियाश्वासि
ति॥७॥ईर्ष्यामानानंतरंश्रुततत्तायानायिकायाःसखीमोगतोप्रतितस्याःकुशलमितिनायकस्यप्रश्नः॥जीवतीतिसख्याउ
त्तरं॥जीवंत्याःकुतःकुशलमितितदभिप्रायः॥अन्यत्रदृष्टमन्यदुत्तरमितिनायकस्यपुनःकुशलंदृष्टामीतिप्रश्नः॥दृष्टमो
त्तरमत्रमितिअभिप्रायेणजीवतीत्यत्रमितिसख्यावचनं॥सखीवचनस्याभिप्रायोह्यटनार्थंपुनरपितंदेवकथयसीतिना
यकस्याक्षेपः॥मृतांनुकथयामियाश्वसीतीतिसख्यास्याभिप्रायोह्यटनं॥प्रयाणेसतितस्याःकुशलंनवतिमद्रागमनस
मयेपिथ्यासेघुसंचरत्कथंतांमृतांकथयेयमित्यभिप्रायः॥प्रश्नोत्तरांतराच्छिन्नमुत्तरंचित्रमुच्यते॥केदारपोषणरताः
केखेटाःकिंचलंवयः॥८॥अत्रकेदारपोषणरताइतिप्रश्नाच्छिन्नमुत्तरं॥केखेटाःकिंचलंवयःइतिप्रश्नद्वयस्यवयर्
थैकमुत्तरं॥उदाहरणांतराणिविदग्धमुखमंडनेद्रष्टव्यानि॥सूक्ष्मंपराशयाभिज्ञेतरसाकूतचेष्टितं॥मयिपश्यतिसा
केशैःसीमंतमणिमार्जणात्॥९॥कामुकस्यावलोकनेनसंकेतकालज्ञानंप्रश्नज्ञातत्वाश्चेष्टेयं॥अस्तंगतेसूर्येसंकेत
कालइत्याकूतं॥यथावा॥संकेतकालमनसंविदंज्ञात्वाविदग्धया॥आसीन्नेत्रार्पिताकूतंलीलापद्मंनिमीलितं॥१०॥ २८
पिहितंपरिधानांतंज्ञातुःसाकूतचेष्टितं॥प्रियेगृहागतेप्रातःकोतातस्यमकत्स्यथत्॥११॥रात्रौसपत्नीगृहेजागरणेनश्रांतो

361
1995

सीतित्यकत्स्यनाकूतं॥यथावा॥वक्त्रस्यंदिस्वेदबिंदुप्रबंधेदृष्ट्वाभिन्नंकुंकुमंकापिकंठे॥पुस्तंतन्व्याव्यंजयंतीवयस्यास्मित्वा
पांगोस्वदूरेखोल्लिलेख॥१२॥अत्रस्वेदानुमितंपुरुषायितंपुरुषायितखंडनेनप्रकाशितं॥व्याजोक्तिरन्यहेतूक्त्यायदाकार
स्यगोपनं॥सखिपश्यगृहारामपरागैरासिधूसरा॥१३॥अत्रचौर्यरतेरतिसंकेतभ्रष्टस्खलंठनलग्नधूलीजालस्यगोपनं॥यथा
वा॥कस्यवानवसंद्रोषःप्रियायाःसव्रणेधरे॥सच्छंगंपश्यमाश्लिष्टापिमयाधुना॥१४॥उपपतिनारचितधरायाना
यिकायाःसकाशमागछंतंप्रियमपश्यंत्येवसख्यानायिकांप्रतिहितोपदेशाव्याजेनतंप्रतिनायिकापराधगोपनं॥छेकापन्हु
तेरस्याश्चार्थविशेषः॥यत्रस्यांवचनस्यान्यथानयनेनापन्हवः॥अस्यामाकारस्यहेत्वंतरवर्णनेनगोपनमिति॥लक्षणं ल
क्ष्यनाम्निचोक्तियहणमाकारस्यगोपनार्थंत्वंतरप्रत्यायकव्यापारमात्रोपलक्षणं॥ततश्च॥आयांतमालोक्यहरिंप्रतोत्यामात्वा
पुरस्तादनुरागमेका॥रोमांचकंपादिभिरुच्यमानंनामाजुगूहप्रणयंत्यचेनमित्यत्रापिव्याजोक्तिरेव॥तत्रह्यनुरागसूचकस्यरोमां
चाद्याकारस्यनाम्निरूपहेत्वंतरप्रत्यायकेनप्रणामेनगोपनंकृतं॥सूक्ष्मंपिहितालंकारोरपिचेष्टितग्रहणमुक्तिसाधारणव्या
पारमात्रोपलक्षणं॥ततश्च॥नलिनीदलेबलाकामरकतपात्रइवदृश्यतेशुक्तिः॥रतिमसंकेतंविज्ञाताचांतदाब्रवीद्रा
त्रीमित्यादिष्वपिसूक्ष्मालंकारःप्रसरति॥अत्रश्लोकेतावत्किमावयोःसंकेतस्थानंनविष्यतीतिप्रश्नाशयेसूचयतिकामुकेत द
भिज्ञयाविदग्धयातयासखीप्रतिसाकूतमत्रमितिसूक्ष्मालंकारोजनवति॥अतोत्रबलाकायामरकतपात्रप्रतिष्ठितशुक्त्युपम
यातस्यानिश्चलत्वेनाश्वस्तत्वंतेनतस्यप्रदेशस्यनिर्जनत्वंतेनदत्तदेवावयोःसंकेतस्थानमितिकामुकंप्रतिसूचनंलक्ष्यते॥
नचात्रध्वनिरशंकनीयः॥दूरव्यज्यमानस्यापिसंकेतस्थानप्रश्नोत्तरस्यश्लोक्तयेवाविष्कृतत्वात्॥एवंपिहितालंकारेप्युदाहार्यं
वक्त्रस्यंदिस्वेदबिंदुप्रबंधेदृष्ट्वाभिन्नंकुंकुमंकापिकंठे॥आलीबालंसस्मितंप्राहमंदंमुग्धाक्षिप्तामत्यपश्यामिनाथं॥१५॥
इत्यादि॥इदमन्यन्नावधेयं॥यत्रासौवेतसीपांथेत्यादिषुगूढोत्तरसूक्ष्मपिहितव्याजोक्त्युदाहरणेषुभावोनस्वात्मविष्कृतः॥
किंतुवस्तुसौंदर्यबलादन्यबोद्धव्यविशेषविशेषिताद्भ्यः॥तत्रवस्तुतोनालंकारलक्ष्यनिर्भासत्वात्॥प्राचांनेःस्वोक्त्याविष्क
रणेसत्यलंकारास्यदतास्तीत्युदाहृतत्वादस्माभिरप्युदाहृतानि॥शंक्यंयत्रासौवेतसीपांथतन्वंयंसरितरासरित्यादीनामि

तिष्ठंतमध्यानेकामिन्यासहसूचनमित्याद्यर्थांतरकल्पनया-नावाविष्करणमित्यतः प्राक्लिखितेषुयेषूदाहरेषुसेकेतकाल
मनसंपुस्लंतन्व्याव्यंजयंती-नामाऽगूहतिनावाविष्करणमस्तितेषुवतन्नदलंकारइति॥गूढोक्तिरन्यादरूपंचदन्यंप्रतिपा
द्यते॥दूषणंहिपरसेनाद्यातिसेनपालकः॥१६॥यंप्रतिकिंचिद्वक्तव्यंतत्तटस्थेसंविज्ञायोक्तितदेवतदन्यंकंचित प्रतिपत्तिरूपेणउच्य
तेचेत्सागूढोक्तिः॥दूषणाद्यदाहरणं॥इहपरकलत्रमुपकूजानेकामकंकामुकंप्रतिवक्तव्ये॥परक्षेत्रेसस्यानिनक्षयंतेकंचि
दुक्षाणंसमीपेचरंतंनिर्दिश्यकथ्यते॥नेयमप्रस्तुतप्रशंसा॥कार्यकारणेत्यादिन्यंगात्वान्नात्॥नापिश्लेषमात्रमप्रस्तु
तार्थस्यप्रस्तुतार्थान्वयित्वेनविवक्षितत्वात्॥तस्यैकलमितरवंचनार्थनिर्दिष्टतयाविशिष्टत्वेविशेषसङ्गात्॥यथावा॥नाथो
मेविषणंगतोनगणयत्येषासपत्नीचमांत्यक्त्वामामिहपुष्पिणीगुरवः प्राप्तागृहाभ्यंतरं॥राज्यामात्रसहायिनीपरिजनश्चा
तोनमांसेवतेस्वामिन्नगम्यलालनीयस्वजनीलक्ष्मीपतेरप्यसौ॥१७॥अत्रलक्ष्मीपतिनास्तोजारस्यागमनं॥आर्यमानामा
स्तटस्थजनवंचनायनगवंतंप्रत्याक्रोशस्यप्रत्यायनं॥विवृतोक्तिः श्लिष्टगुप्तंकविनाविष्कृतंयदि॥दूषणेहिपरसेनादितिव
क्तिससूचनं॥१८॥श्लेषणगुप्तंवस्त्वयाकथंचित्कविनाविष्कृतंचेद्विवृतोक्तिः॥दूषणेहीत्युदाहरणेपूर्ववद्गुप्तंवस्त्वससूच
नमितिकविनाविष्कृतं॥यथावा॥वत्सेमागाविषादंस्वमनसिकृरुवंसंत्यजोर्ध्वंप्रयत्नंकंपः कोवागुरस्तेकिमिहबलन्निद्राजृं
भितेनात्रयाहि॥प्रत्याख्यानंसुराणामितिनयशमनच्छद्मनाकारयित्वायस्मैलक्ष्मीमदाद्वःसदहतुदुरितंमेथमन्थःपयो
धिः॥१९॥इहैवपरवंचनायगुप्तविष्करणं॥अपागुप्तविष्करणंयथा॥दृष्ट्याकेशवगोपरागहतयाकिंचिन्नदृष्टंमयातेनेहमव
लितास्मिनाथपतितांकिंनामनालंबसे॥एकस्त्वंविषमेषुखिन्नमनसांसर्वाबलानांगतिर्गोप्यैवंगदितः सलेशमवता द्वोष्ठे हरिर्नः
स्थिरं॥२०॥अत्रलक्ष्मीनाथस्यपुरतोविषमेपथिस्वलनमभिहितवत्यासंकामयमानायागोपिकायाःवचनेनविषमपथिस्वलन
पतनत्राणप्रार्थनारूपेणस्फुटितिप्रतीयमानेनार्थेनगुप्तंविवक्षितमर्थांतरगुप्तंसलेशंससूचनमित्यनेनाविष्कृतं॥एवंनेषा
दिषु॥चेतोनलंकामयंतमदीयंन्यन्यत्रकुत्रापिचसान्निध्यं॥इतिदमयंतीवाक्यादिकमप्युदाहरणं॥सर्वमिदंशब्दशक्तिक्रीडीकृत
गुप्तार्थाविष्करणं॥अर्थशक्तिमूलगुप्तार्थाविष्करणं॥यथा॥गच्छास्मच्युतदर्शनेननवतः किंतेनिरूप्यतेकिंवेविजनस्थेयो

363
1995

हृतजनःसंनाचयत्यन्यथा॥इत्यामंत्रणसंगिसूचितरूपावस्थानंवेदात्मसामाश्लिष्यत्युत्कोकरांचिततनुंगोपोहरिःपातु
वः॥२१॥अत्रगच्छास्मच्युतेत्याद्यामंत्रणेनत्वयारंतुमेतावत्कालंस्थितंतन्नलब्धमित्यर्थशक्तिलक्ष्यंयत्कृतीयपादेनावि
ष्कृतं॥सर्वमेतत्कविनि॥बद्धवक्रगुप्ताविष्करणोदाहरणं॥कविगुप्ताविष्करणंयथा॥सुरुचकुंकुमेतत्यपास्तमनाक्त्व
त्कोकथायोषितांदूरादेवविजृंभिताःसुरनद्यःस्तग्गंधधूपादयः॥कोपरागिणिमुंचमय्यवनतेदृष्टप्रसीदाधुनासत्य
मद्विरहाद्भवंतिदयितेसर्वाममोधादिशः॥२२॥अत्रतावदीर्ष्याकलुषितदयिताप्रसादनव्यापारोस्फुटितप्रतीयते॥दृ
ष्टिरागानंतरंदृष्टिप्रत्याक्रोशोविवक्षितार्थः॥सचदृष्टइत्यस्यकुंतोच्चारणेनसंबुद्धिरूपतामुपगम्याविष्कृतः कविनि ब
द्धवक्रगुप्तंपरवंचनायै॥कविगुप्तंस्वबोद्धिप्रकटनार्थमितिनेदः॥युक्तिःपराभिसंधानंक्रियतामर्मगुप्तये॥त्व मा
लिखंतीदृष्ट्वान्यांधुनुःपोष्यकरेलिखन्॥२३॥अत्रपुष्पचापलेखनक्रिययामन्मथोनयालिखितइतिश्लोकपादेननस्वा
नुरागरूपमर्मप्रकाशनायपरवंचनंविवक्षितं॥यथावा॥दंपत्योर्निशिजल्पतोर्गृहशुकेनाकर्णितंयद्वचस्तत्तातस्यरुषांनि
धानिगदितस्यातिमात्रंवधूः॥कर्णालंबितपद्मरागशकलंविन्यस्यचंचूपुटेश्रीखंडंशकरोतिदाडिमफलव्याजेनवाग्वंध
नं॥२४॥अत्रशुकवाक्यबंधनेनतन्मुखेनस्वकीयरहस्यवचनमश्रूयजनवचनंस्तं॥व्याजोक्तावाकारगोपनंयुक्तोत्त
व्यगोपनमितिनेदः॥यद्वाव्याजोक्तावुत्तमागोपनमिहक्रियायागोपनमितिनेदः॥एवंचआर्योतमालोक्यहरिंप्रतीत्यामि
तिश्लोकेपियुक्तिरेव॥लोकप्रवादानुस्मृतिर्लोकोक्तिरितिनप्यते॥सहस्वकतिचिन्मासान्मौलयित्वाविलोचने॥२५॥अत्र
विलोचनेमौलयितिलोकप्रवादानुस्मृतिः॥यथावा॥मदीयवररुजस्तवे॥नामबंधवरदोक्षितदातृनाबंध्याख्यात्य
क्तोनवहसेवरदानुमुद्रां॥विश्वप्रसिद्धतरविप्रकुलप्रसूतेर्यज्ञोपवीतहवनंहिनखल्वपेक्ष्यं॥२६॥अन्योत्तरार्थेलोकवा
दानुकरं॥छेकोक्तिर्यत्रलोकोक्तेःस्यादर्थांतरगर्भता॥ऊर्जगएवजानीतेऊर्जगचरणसखे॥२७॥केनचित्स्वचित्तरतां
तेदृष्टस्यसमीपस्थमन्यंनिर्दिश्यायमेवतस्यवक्तीतिजानातीत्यूर्ध्वतोयमहेःपादानहिरेवंविधेतिलोकवादानुवादः
अत्रसचायंचलोकविदितधनार्जनादिव्यापारेसहचारिणाविदितविषयतयालोकोक्त्यनुवादस्यप्रयोजनस्थितेरहस्य

पिक्षिगंव्यापारेतस्यायंसहचरइतिमर्मोद्घाटनमपितेनगम्यतेयथावा॥मलयमरुतांवातायातावि कासितमल्लिकापरिम
लभरोन्मत्तोयंषट्पदस्तत्सहसेयदि॥घनघटयितुंतन्मिस्नेहंयएवनिवर्तनेप्रभवतिगवांकिंनछिन्नेसएवधनंजयः॥२८॥
अत्रधनलिप्सयाप्रोषितोगनासखीवचनेयएवगवांनिवर्तनेप्रभवतिसएवधनंजयइत्यंप्रजातिप्रसिद्धोकवानुका
रः॥अतिसौंदर्यशालिनीमिमामपहायधनलिप्सयाप्रस्थितोरसानभिज्ञइतिगोप्रायएव॥तस्यनिवर्तकस्यधनस्यः
जेताधनेनाकृष्टस्यतद्दिमुखीकरणेनप्रत्याकर्षकत्वादित्यर्थांतरमपिगम्यतेइतिवक्रोक्तिः॥श्लेषकाकुन्यामपरार्थप्र
कल्पनं॥मुंचमानंदिनंप्राप्तेनेहनंदितुंतिक॥२९॥अत्रमानंमंचप्रभातंजातंनरात्रिरित्यारोपयतोस्तायांवाचिनंदि
नंप्राप्तंमामेवेत्यर्थांतरंश्लेषणपरिकल्पितं॥यथावा॥अहोकेनेदृशीबुद्धिर्दारुणातवकल्पिता॥त्रिगुणाश्रूयतेबुद्धि
तुरात्मयीक्वचित्॥३०॥इदमविलतश्लेषवक्रोक्तेरुदाहरणं॥विलतश्लेषवक्रोक्तेर्यथा॥नविन्दिरंजोरत्रिदशावरुन्धा
निरधुनासतेरामलतानयधिपुरातोलक्ष्मणसख्यः॥इयंयास्यकृच्छ्रेविपदमधुनावानरचमूलधिष्ठंदशग्रीवासुरविलोपा
यहपुनः॥३१॥सर्वमिदंवक्रश्लेषमूलायावक्रोक्तेरुदाहरणं॥अर्थश्लेषमूलायथा॥शिक्षाधीक्षप्रयातःसतनुवलि
मखंतांडवंकाप्यचन्द्रेमन्येदंदावनांतंकनुसमगरिष्युर्नेवजानेवराहं॥कश्चिल्लोलश्रेषणाजरद्गतनुगोपएवास्यवत्ता
लीलासल्लापरथंजलनिधिहिमवत्कन्ययास्त्रायतांवः॥३२॥काकायथा॥असमालोच्यकोपस्तेनोचितोयमितीरिता॥
नेवोचितोयमितितंतांडयामासलीलया॥३३॥अत्रनेवोचितोकाकास्वरविकारेणउचितएवव्यर्थांतरकल्पनं॥स्व्जावोक्ति
ःस्व्जावस्यजात्यादिरूपस्यवर्णनं॥कुरंगेरत्नरंगाक्षैःस्तब्धकर्णैरदक्षितं॥३४॥यथावा॥तासांमुखप्रचलितोसविधेगुरू
णांमार्गप्रदानरभसस्खलितावधानो॥पार्श्वोपसर्पणमुनावपिभिन्नदिक्कंकृत्वामुहुःकुहरपांसरतांसलज्जं॥३५॥नाविककू
तनव्यार्थसाक्षात्कारस्यवर्णनं॥अहंविलोकयेद्यापियुध्यंतेवस्करासराः॥३६॥स्थानंनौषणंबोद्धानपरमिदं॥यथावा॥
अद्यापितिक्षतिशाद्दरिदमुतरीयंधनुंपुनस्तनतटाद्गलितंप्रगृह्णते॥वाचंनिशम्यनयनंनयनेममेतिकिंचिन्नरायदकरोस्मि
तमायतास्ी॥३७॥उदात्तमलंकृतिश्लाघ्यंचान्यान्यलक्षणं॥सानोयस्यानवद्यकृतंश्लाघ्यंजातिक्रियादिभिः॥३८॥इदंश्लो

305
1775

घ्यचरितस्यान्यांगत्वउदाहरणं॥कस्याउदाहरणेयथा॥रत्नस्तेनेपुसंक्रांतैःप्रतिबिंबशतैश्चितः॥ज्ञातोलंकेश्वरःकृष्णा दा
नेनेयनतत्वतः॥३९॥अत्रकृष्णस्यदुर्जातख्यशोर्यादिवर्णनं॥त्वयिदातरिराजेंद्रयाचकाःकल्पशाखिनः॥४०॥इयमोदार्यो
क्तिः॥शौर्योक्तिर्यथा॥राजन्यस्तास्यकृपाणास्त्वत्तापाग्निशोषिताः॥पुनस्त्वद्वैरिवनिताबाष्पपूरेणपूरिताः॥४१॥संपदल
क्ष्मोदात्तालंकारः॥शौर्योक्तावत्यत्युक्तेरिति केचिदाहुः॥अनयोरनवद्योक्तिस्तनयोर्जीवमाणयोः॥अवकाशोनपर्यो
प्तस्तवबाहुबलोत्तर॥४२॥अत्यंनिर्मितमाकाशमनालोच्यैवंविधंमयाविभवत्यास्तनमंडलमिति॥४॥स
दसदुक्तिरतस्मिन्नतिशयोक्त्यलंकारेनेदः॥निरुक्तियोगतोनाम्नामन्यार्थत्वप्रकल्पनं॥ईदृशोश्चरितंजोनसत्यंदोषकृ
दोभवान्॥४४॥यथावा॥पुराकवीनांगणनाप्रसंगेकनिष्ठिकाधिष्ठितकालिदासः॥अद्यापितत्तुल्यकवेरभावादनामिकासा
र्थवतीमधन्यं॥४५॥अतिषेधः प्रसिद्धस्यनिषेधस्यानुकीर्तनं॥नत्यंतमेतकितवस्त्रीजनेनिरीतःशरः॥४६॥निर्ज्ञातोनिषेधः
स्वतोनुपयुक्तत्वादर्थांतरंगम्यीकरोति॥तेनचारुतान्वितोयंप्रतिषेधनामालंकारः॥उदाहरणं॥युद्धरंगेप्रभवतिष्ठमानंशा
कुनिप्रतिविदग्धवचनं॥अत्रयुद्धस्यचाक्षयुत्वज्ञानेनिर्ज्ञातएवकीर्त्यमानस्तत्रैवतवरागस्यंनयुध्येत्यस्यनिग्रहोस्ती
त्युपहासंगम्यीकरोति॥तच्चकितवत्यजनेनाविक्षितं॥यथावा॥नविषेणनशस्त्रेणनाग्निनानचमत्यना॥अप्रतीकारपार्थ्याः
स्त्रीभिरबलाभिरयंहतः॥४७॥अत्रस्त्रीणांविषादिनिर्मितत्वज्ञानवत्प्रसिद्धएवपरिकीर्त्यमानस्तासांविषाद्यतिशायिकोदि
त्यमित्यमुमर्थंव्यक्तीकरोति॥सचाप्रतीकारपार्थ्याइतिप्रतीकारवद्भोविषादिभ्यस्तासांविशेषंदर्शयताविशेषणेनाविक्षि
तः॥सिद्धस्यविधानंयत्तदाहुर्विध्यलंकृतिं॥पंचमोदंचनेकालेकोकिलःकोकिलोभवेत्॥४८॥निर्ज्ञातविधानमनुपयुक्त
त्वाधिक्यंसदर्थांतरगम्यीकरणेनचारुतरमितितंविधिनामानमलंकारमाहुः॥उदाहरणेकोकिलस्यकोकिलत्वविधानम
नुपयुक्तंसदतिमधुरपंचमध्वनिशालितयासकलजनहृद्यत्वंगम्यीकरोति॥तच्चपंचमोदंचनइतिकालविशेषणेनाविक्षि
तं॥यथावा॥हेहस्तदक्षिणमतस्यशिशोर्द्विजस्यजीवातवेविसृजशरद्गमनोरुपाणं॥रामस्यगात्रमसिनिर्नरगम्यसिन्नसीता
वासनपटोःकरुणाकुतस्ते॥४९॥अत्ररामस्यस्वहस्तंप्रतिरामस्यगात्रमसीतिवचनमनुपयुक्तंसत्रामस्येत्यनेनस्वस्यांगंत

निष्करणत्वंगनीकरोति॥तच्चनिर्वेदस्यादिविशेषणेनाविच्छते॥यद्यप्यनयोर्विधिप्रतिषेधयोरुदाहरणेषुव्यंग्याथोंतरसंक्रमित
वाच्यरूपाणितथापिनध्वनिभावास्यदानिस्वोक्तयेवव्यंग्यविशेषाविष्करणात्॥व्यंग्याविष्करणेचालंकारत्वमेवेतिप्राकूप्रस्तु
तांकुरप्रकरणेव्यवस्थितत्वात॥पूर्वंबाधितोविधिप्रतिषेधोआक्षेपनेदित्वेनोक्तो॥इहतुप्रसिद्धोविधिनिषेधोतत्प्रतिहं
द्वीनावलंकारांतरत्वेनवर्णितोविनिर्भेदः॥हेतोर्हेतुमतासार्धंवर्णनंहेतुरुच्यतेअसावुदितश्रीतांशुमानभेदायसकल्पतां॥
५०॥यथावा॥एषतेविद्रुमच्छायोमरुमार्गरवाधरः॥कस्यनातनुतेतन्विपिपासाकुलितंमनः॥५१॥मानेनेक्षतिवारय=
त्यकृपामेक्षमाभिसेत्योर्द्वियोस्यातंत्र्येपरिरक्षतिस्थितिकरोव्याधूयधर्यंगते॥तद्दत्वामनुबभूवतापफलमित्यत्तंजनेना
नामुनायत्स्वप्नेनपराभवेचरणोस्प्रष्टुनसंमन्यते॥५२॥इत्युदाहरणं॥हेतुर्हेतुमतोरेकंहेतुंकेचित्प्रचक्षते॥लक्ष्मी
विलासाविदुषांकटाक्षवंकठत्रनो॥५३॥अत्रकार्यानवस्थेवभावादिप्रशायनार्थं॥कार्यकारणानेदव्यपदेशःयथावा
आयुर्दीनहोमत्सवस्यविनतस्रोणीस्तनोमूर्तिमानविश्वासोनयनोत्सवोमृगदृशांकीर्तेःप्रकाशोपरः॥आनंदःकलिकाछतिः
सुमनसांवीरश्रियोजीवितंधर्मस्यैकनिकेतनंविजयतेवीरःकलिंगेश्वरः॥५४॥अत्रदानमहोत्सवायुद्धरत्वादिनाध्व
सितेराजितदायुष्यादिव्यपदेशः॥ ॥इत्थंज्ञातमलंकारालक्षयित्वानिदर्शिताः॥प्राचामाधुनिकानांचतामन्यालोच्यस
र्वेशः॥५५॥चत्वारोरसवत्प्रेयऊर्जस्वीचसमाहितं॥भावस्योदयःसंधिश्चबलत्वमितित्रयः॥५६॥अष्टौप्रमाणलंकाराः
प्रत्यक्षप्रमुखाःक्रमात्॥एवंषंचदशान्यानप्यलंकारानविदुर्बुधाः॥५७॥तत्रविभावानुभावव्यभिचारिनिर्वेदजितोरतिहास
शोकादिचित्तवृत्तिविशेषोरसः॥सयत्रापरस्यांगंनवतितत्ररसवदलंकारः॥विभावानुभावाव्यभिचारिनिर्वेदादिस्मय
स्त्रिशद्देवादेवतागुरुनृपतिपुत्रादावभिव्यज्यमानारतिस्थायिभावः॥सयत्रपरस्यांगंतत्रप्रेयोलंकारः॥अनौचित्येनप्रवृत्तो
रसोभावश्चरसाभासभावाभासश्चेत्युच्यते॥सयत्रपरस्यांगंतदूर्जस्वीभावस्य॥प्रशाम्यद्दवस्थाभावशांतिः॥तस्याअपरांगत्वे
समाहितं॥भावस्योद्भावस्थाभावोदयः॥द्वयोर्विरुध्योर्भावयोःपरस्परस्पर्धिभावोभावसंधिः॥बहूनांभावानांपूर्वंपूर्वोपम ३१
र्दोत्तरोत्तरभावशबलता॥एतेषांअपरांगत्वेभावोदयाद्याश्चत्वोलंकाराः॥तत्ररसवदुदाहरणं॥मुनिर्जेयतिरागीद्वेमहात्माकुं

367
1995

चसंभवः॥येनैकचुलकेदृष्टोद्वादिव्योमस्यकश्यपो॥५८॥अत्रमुनिविषयरतिरूपस्यभावस्याद्भुतरसांगं॥यथावा॥अयंसरसनो
त्कर्षीपीनस्तनविमर्दनः॥नाभ्यूरुजघनस्पर्शीनीवीविस्रंसनःकरः॥५९॥अनेकरणस्यश्रृंगारांगं॥प्रेयोलंकारएवभावालंकार
उच्यते॥सयथा॥कदाचाराणस्यामसरतिनीरोधसिवसनवसानःकोपीनेशिरसिनिदधानोंजलिपुटं॥अयंगौरीनाथस्त्रि
पुरहरशंभोस्त्रिनयनप्रसीदेत्याक्रोशन्निमिषमिवनेष्यामिदिवसान्॥६०॥अत्रशांतिरसस्यकेतिपदसूचितश्चिंताख्योव्य
भिचारीभावोंगं॥यथावा॥अस्युच्चाःपरितःस्फुरंतिगिरयःस्फारास्तथोद्यत्तानेतानपिवीचतीकिमपिनाश्रांतासितुंमन
मः॥आश्चर्येणमुहुर्मुहुःस्तुतिमितिप्रस्तौमियावद्भुवस्तावद्विभ्रदिमांस्मरंतस्तवकःकोवाचस्तनाभूद्विताः॥६१॥अत्रप्रभुवि
षयरतिभावस्यवस्तुमतीविषयरतिभावोंगं॥उर्जस्वीयथा॥त्वत्खड्गेविवसंधेनुतरणीःसंत्रासतःसत्वरंयातावीरविलुंठितुंसर
संयाताःकिरातावने॥तिष्ठंतिस्तिमिताःप्रकृष्टपुलकास्तेविस्मृतापक्ष्मासासमुनरत्नैःस्तनैरतितरांबालैरपांगैरपि॥६२॥
अत्रप्रकृतिविषयरतिभावस्यश्रृंगाररसांगं॥यथावा॥त्वयिलोचनगोचरंगतेसफलंजन्मनरसिंहभूपते॥अजनिष्टममेति
सादरंधिषितापयतिद्विषोगणः॥६३॥अत्रकवेःप्रकृतिविषयस्यरतिभावस्यतद्विषयद्विड्गणस्यरतिरूपोभावोंगं॥सः
माहितंयथा॥पश्यामःकिमियंप्रपद्यतरतिस्त्रैर्यंममालंबितंकिंमोनालपतीत्ययंखलुशठःकायस्तयाप्याश्रितः॥इत्यन्यो
न्यविलक्ष्यदृष्टिचतुरंतस्मिन्नवस्कोतरेसव्याजंहसितेमयाधृतिहरोबाष्पस्तमुक्तस्तया॥६४॥अत्रश्रृंगारस्यकोपशांति
रंगं॥भावोदययथा॥तयादविश्रम्यदयाकुरंधिमरिनेनिनीषामिभवद्विलोकिनी॥अदर्शिपादेनविलिख्यपत्रिणातवैवरू
पेणसमःसमर्पितः॥६५॥अत्रनलंप्रतिदमयंत्याऔत्सुक्यरूपभावस्योदयःश्रृंगाररसस्यांगं॥भावसंधिर्यथा॥एकाभू
त्सुमायुधेधुरिवप्रत्यक्षपुंस्कावलीजेतुंमंगलमालिकेवपुलकैरन्याकपोलस्थली॥लोलाक्षीक्षणमात्रभाविविरहक्लेशास
हांपश्यतोद्रागाकर्णयतश्चवीरभवतःप्रौढावहाडंबरं॥६६॥अत्ररमणीप्रेमरणोत्सुक्ययोःसंधिःप्रकृतिविषयरतिभावस्यांग
भावशबलत्वंयथा॥क्वकार्यंरागांधःक्वचकुलंजुगुप्सेयंदृष्टेयतसहसोपाणमुपरांतयेश्चतमहोकोपेपिकांतेमुखे॥किंवस्तु
त्यपकृत्यमाभःकृतधियःस्वप्नेपिसादुर्लभाःचेतःस्वास्थ्यमुपेहिकःखलुयुवाधन्योधरंधास्यति॥६७॥अत्रविर्तोत्सुक्यम

तिस्मरणशंकादैन्यधृतिचिंतानोशबलताविप्रलंभनष्टंगारस्यागं॥ प्रमाणालंकारेप्रत्यक्षंयथा॥ कोतकोतवदनप्रतिबिंबेभग्नबा
लसहकारसुगंधौ॥स्वादुनि प्रणुदितालिनिषीतनिर्वारमधुनीद्रियवर्गः॥६६॥यथावा॥किंतावत्सरासिसरोजमेतद्वारा
दहोस्विन्मुखमवभासतेयत्वयाः॥संशय्यक्षणमितिनिश्चिकायकश्चिद्विवोकैर्बकसहवासिनोपरोक्षैः॥६९॥पूर्वत्रप्रत्यक्ष
मात्रमत्रतुविशेषदर्शनजन्यसंशयोत्तरप्रत्यक्षमितिभेदः॥अथानुमानं॥यथा॥रघ्रोन्मुखश्चलजलदधूमस्कंधगयतिस्फु
ल्लिंगानोरूपंदधतिचयथाकीटमणयः॥यथाविद्युज्ज्वालोल्लसितपरिपिंगाश्वकुलस्तथामन्येलग्नःपथिकतरुखंडेस्मरद
वः॥७०॥यथावा॥यत्रेतालहरीचलांचलदृशोव्यापारयंतिभ्रुवोयत्रैवपतंतिसंततममीमर्मस्पृशोमार्गणाः॥तच्चक्रीड
तचापपुंखितशरंत्रैखल्करःक्रोधनोध्वत्यग्रतएवशासनधरःसत्यंतदासांस्मरः॥७१॥पूर्वंरूपसंकीर्णं॥इदमतीतायोग्नि
संकीर्णमितिभेदः॥शुद्धानुमानंयथा॥निलीयमानेविहगेनिमीलिद्दृश्यपंकजे॥विकासत्याचमाल्यागतोस्तंज्ञायतेर
विः॥७२॥यथावा॥सोमित्रेननुसेव्यतांद्रुमतलंचंडांशुरुज्झेतेचंडांशोर्निशिकाकुभारघुपतेचंद्रोयमुन्मीलति॥वत्सेत
द्विदितंकथंनुभवताध्वानेकुरंगंयतःकांसित्रेयसिहाकुरंगनयनेचंद्रानभेजानकी॥७३॥उपमानंयथा॥तारोहिणीवि
जानीहिज्योतिषामंत्रमंडले॥यस्तन्वितारकन्यासःशकटाकारसंस्थितः॥७४॥अत्रमन्मथमिवातिसुंदरंदानवारिमिवदि
व्यतेजसं॥शीलराजमिवधैर्यशालिनंवेत्सिचेकटपतिंमहीपतिं॥७५॥पूर्वत्रोदाहरणेउपमानमूलभूतमनिदेशवाक्यं
दर्शितं॥अत्रातिदेशवाक्यार्थसादृश्यस्यप्रत्यक्षरूपमुपमानफलत्वेनसहदर्शितमितिविशेषः॥शब्दप्रमाणंयथा॥वि व
क्षतादोषमपिच्युतासनात्वयेकमीशंप्रतिसाधुभाषितं॥यमामनंत्यात्मविदोपिकारणंकथंसलक्ष्यप्रभवोभविष्यति॥
७६॥अत्रशिवःपरमेष्ठिनोपिकारणमित्यत्रश्रुतिरूपंशब्दप्रमाणमुपन्यस्तं॥एवंस्मृतिपुराणागमलौकिकवाक्यरूपाण्य
पिशब्दप्रमाणान्युदाहरणानि॥तत्रस्मृतिर्यथा॥बलात्कृतपापानिसंतुतान्यस्तानिच॥सवान्बलात्तानर्थानस्तान्म
नुरब्रवीत्॥७७॥पूर्वश्रुतिरात्रिमतार्थेप्रमाणत्वेनोपन्यस्ता॥इहतुस्मृतिर्जिनेंद्रिमतार्थेतद्दूषणपरेणप्रमाणतयोपन्य
स्तेतिविशेषः॥आचारात्संतुष्टोरविमीमांसकोक्तधर्मप्रमाणयोर्वेदशब्दानुमापकतयाशब्दप्रमाणएवांतर्भावः॥तत्राचार

३२

369
1995

प्रमाणंयथा॥महाजनाचारपरंपरेदृश्यिनामनामाददतेनसाधवः॥अतोन्विधातुंनतदुस्सहेपुनर्जनः॥किंनाचारमुचंविग
ायति॥७८॥आप्तस्तुष्टिप्रमाणंयथा॥असंशयंक्षत्रपरिग्रहक्षमायदार्यमस्यामभिलाषिमेमनः॥सतांहिसंदेहपदेषुव
स्तुषुप्रमाणमंतःकरणप्रवृत्तयः॥७९॥अत्रदुष्यंतेनाप्तस्याशंकितलायाःपरिग्रहस्यधर्मत्वंकृत्यनुमितमुन्नीयते॥
एवंस्मृतिलिंगादिकमपिमीमांसकोक्तंप्रमाणंसंभवति॥तत्रस्मृतिर्यथा॥त्वंहिनाभिवधरोनाथस्तेवरमद्रिकं॥नहिस्म
तिप्रसिद्धेर्वेलिंगमाद्रियतेबुधैः॥८०॥अत्रकरिगिरीश्वरस्यवरदस्यसन्निधानस्मरणसर्वाभिलषितदातृत्वंसमर्थितं॥
लिंगंयथा॥विदितंवोयथास्वार्थानमेकाश्चित्प्रवृत्तयः॥ननुमूर्तिर्निरष्टानिरित्थंभूतासिसूचिता॥८१॥अत्रशिवस्य
स्मृतिप्रसिद्धस्योपकारकत्वाच्चाष्टमूर्तेपरिग्रहलिंगेनतत्प्रवृत्तीनांलोकानुग्रहप्रयोजनंसूचितं॥लिंगस्यापि
मूलभूतवेदानुमापकतयावैदिकशब्दप्रमाणएवांतर्भावः॥एवंलौकिकलिंगानामपिलौकिकशब्दाम्नायकृतया लौकिकशब्द
प्रमाणएवांतर्भावः॥अतः॥लोकतन्मूलतयाविपक्षदिगुपन्यासेविधूतंशिरस्त्वदुक्तंतपरीक्षणेकृतनमस्कारोविलक्ष्यस्थि
तः॥ईषन्नाम्रकपोलकांतिनिमुखेदृष्ट्वोनतःपादयोरस्रष्टोगुरसन्निधावपिविधिर्द्वांन्योनकालोचितः॥८२॥इत्यादिपुरु
षरूपंप्रमाणांतरमानीयं॥क्वचिच्छब्दप्रमाणकल्पनयाचमत्कारोयथा॥किमसन्निगलेपितेर्जउमन्यसेमयिनिमज्ज
तुनामसकृतामनः॥ममकिलश्रुतिमाहतदर्थिनलमुखेदुपरोविबुधःस्मरः॥८३॥अत्रम्रियमाणानांमनस्त्वंद्रव्यविशे
षेतदर्थिकायाः श्रुतेनलमुखचंद्रविषयत्वेकल्पितेतथाव्याख्यातस्मरवाक्यंप्रमाणतयोपन्यस्तं॥अर्थापत्तिर्यथा॥निणे
तुंराक्यमस्तीतिमध्यंतवनितंविनि॥अन्यथानोपपद्येतपयोधरनरस्थितिः॥८४॥यथावा॥व्यक्तंबलीयान्यदिहेतुरागं
मादूरयत्साजालधिंनजान्हवी॥गंगोघनिर्नस्तिरश्चकंधरासवर्णमर्णःकथमन्यथास्यात्॥८५॥अनुपलब्धिर्यथा
स्फुटमसद्बलवंतंनिश्चिनोतेतस्तदनुपलभमानास्तर्कयंतोपिलोकाः॥कुचगिरिवरयुग्मंयद्विधानाथमास्तेतदिहम
करकेतोरद्रिजालंप्रतीमः॥८६॥संभवोयथा॥अभूतपूर्वंममभाविकिंवासर्वंसहेमेसहजंहिदुःखं॥किंतुत्वदंघ्रिशरणा
गतानांपराभवोनाथनतेनुरूपः॥८७॥यथावा॥येनामकेचिदिहनःप्रथयंत्यचोजोनंतेतेपिमानृतिनेषयत्नः॥

उत्पत्स्येतस्ति ममकोपिसमानधर्मा कालोह्ययंनिरवधिर्विपुलाचपृथ्वी॥ ६६॥ यथावा॥ अतः पीथकृतोऽनवान्नगरतोवार्त्तानवा वर्त्तेतवादं ब्रूहियदिवापथो दसमंयत्यस्काश्रियंजीवति॥ सत्यंजीवतिजीवतीतिकथितावार्त्तामयापिश्रुतावि स्तीर्णापृथिवीजनोपि विविधःकिंकिंनसंभाव्यते॥ ६९॥ अत्राद्योदाहरणेअभूतपूर्वमसंभाविकिंवानिसंभवप्रमाणसिद्धोर्थोदर्शितः॥ द्वितीयोदाह रणेसंभवोपपादकंकालानंत्यादिकमपिदर्शितं॥ तृतीयोदाहरणेसंभवोपिकेनाऽपीतिनेदः॥ एतिह्ययथा॥ कस्याणीवतगाथेयं लोकिकीप्रतिभातिमे॥ एतिजीवंतमानंदोनरवर्षशतादपि॥ ७०॥ अत्रलोकिकीगाथेयमित्यर्थेनिर्दिष्टप्रबंधकप्रबादपार पर्यरूपतादर्शिता॥ अथैतेषामलंकाराणांयथासंभवंकचिन्मेलनेलोकिकालंकाराणांमेलनइवचारुत्वातिशयोपलंभात्॥ नरसिंहन्यायेनैषांगलंकारावस्थितोतन्निर्णयःक्रियते॥ तत्रतिलतंडुलन्यायेनस्फुटावगम्यनेदालंकारमेलनेसंसृष्टिः नीरक्षीरन्यायेनास्फुटालंकारमेलनेसंकरः॥ सचांगांगीभावेनसमप्राधान्येनसंदेहेनैकवाचकानुप्रवेशेनेतिचतुर्विधः एवंसंसृष्टिहाकारपंचालंकाराः॥ तत्रसंसृष्टिर्यथा॥ ७१॥ अत्रशब्दालंकारस्यानुप्रासमेदयोःसंसृष्टिः॥ लिंपंतीवतमोंगानि वर्षंतीवांजनंनभः॥ असत्पुरुषसेवेवदृष्टिर्निष्फलतांगता॥ अत्रोत्प्रेक्षयोरपमायाश्चेत्यर्थालंकाराणांसंसृष्टिः॥ आनंदमेदुरपुरंदरमुक्तमाल्यमोलेर्हठेनजिहितंमहिषासुरस्य॥ पादांबुजंनवतुमेविजयायमंजुमंजीरसिंजितमनोहरमंबिकायाः ७२॥ अत्रशब्दार्थालंकारयोरनुप्रासोपमयोःसंसृष्टिः॥ अंगागीभावसंकरोयथा॥ तलेवेपंतमहीरुहाणांछायास्तदामारुतकंपितानां॥ शशांकसिंहेनतमोगजानांलूनाऽलतीनामिवगात्रखंडाः॥ ७३॥ अत्रशशांकसिंहेनेतितमोगजानामितिचरूपकं॥ यद्यप्यत्रशशांकएवसिंहस्तमस्येवगजाइतिमयूरव्यंसकादिसमासाश्रयणेनरूपकं॥ शशांकःसिंहइवतमोसिगजाइवेत्युपमितसमासाश्रयणेनोपमापिवक्तुशक्या॥ तथापिलूनाऽलतीनामितिविशेषणानुगुण्यात्॥ रूपकसिद्धिः॥ तस्यविशेषणस्यप्रधानेनसहायनन्वाक्येनतुगुणेन॥ गुणानांचपरार्थत्वादसंबंधः॥ समत्वात्स्यादितिन्यायात्॥ उपमितसमासाश्रयेणतस्यपूर्वंपदार्थेप्रधानत्वात्॥ शशांकस्यतमसांचप्राधान्येनवक्तृ॥ तत्रनविशेषणमुख्यार्थान्वयस्वारस्यमस्ति॥ स्वरूपनाशरूपोपिचरितालतिलवनकर्तृत्वधर्मत्वान्वयसंभवेपिमुख्यार्थान्वयस्वारस्यमेवादरणीयं॥ अतःस्वरूपनाश

३३

३११
1795

क्रोडीकरणेनप्रकृतयालक्षणमूलयातिशयोक्त्यारूपकसिद्धिः॥ तच्चरूपकमुल्लेक्षागं॥ तदुत्थापकत्वात्॥ रूपकाभावेहिक्षायालूनगात्रखंडारवावेपंतेतावदुक्तावपमेवसिध्येत्॥ वेपनादिसाधर्म्यात्॥ नक्षायानांसंयःलतगात्रखंडतादाम्यसंभवना रूपोल्लेक्षा॥ ननुशशांकेनलूनालतीनांतमसांगात्रखंडारवावेपंतेयेतावदुक्तावपिसिध्यत्युल्लेक्षा॥ तादाम्यसंभावनोप यकत्वेनालूनत्वादिरूपादिकविशेषणोपादानात्॥ सत्यंतथोक्तावालतिलवनादिरूपधर्मकार्यसमारोपनिमित्तशशांकतम सोर्हंहंतत्यक्तनतत्स्वरूपतासमारोपरूपासमासोक्तिरपेक्षणीया॥ एवमुक्तोरूपकमितिविशेषः॥ एवमन्यातिशयोक्तिरूपकोल्लेक्षणासंगांगीभावसंकरः॥ समप्राधान्यसंकरायथा॥ अवतुनःसवितुस्तुरगावलीसमतिलंघिततुंगपयोधरा॥ स्फुरितमध्यगतारुणनायकामरकतैकलतेवनभःश्रियः॥ ७४॥ अत्रपयोधरादिश्लेषमूलातिशयोक्त्यंगभूतयोस्थाप्यमानेवसवितृतुरगावल्योंगगनलक्ष्मीमरकतैकावलीतादात्म्योल्लेक्षा॥ ननोलक्ष्मीनायकाव्यवहारसमारोपरूपकसमासोक्तिरंगंनैवोत्थाप्यते॥ पयोधरस्यश्लेषस्योन्नयापकारकत्वात्॥ ततश्चोल्लेक्षासमासोक्त्योरेकःकालः॥ परस्परापेक्षयाचारुत्वसमुन्मेषश्चोन्नयोस्तुल्यइतिविनिगमनाविरहात्समप्राधान्यं॥ यथावा॥ अंगुलीभिरिवैकेशंचयंनिगृह्णतिमिरंमरीचिभिः॥ कुड्मलीकृतसरोजलोचनंचुंबतीवरजनीमुखंशशी॥ ७५॥ अत्रांगुलीभिरिवेतिवाक्योक्तोपमयांगांगभूतयोस्थाप्यमानेवशशिकर्तृकनिशामुखचुंबनोल्लेक्षा॥ शशिन्युपपत्तिव्यवहारसमारूपसमासोक्तिरंगंनैवोत्थाप्यते॥ उपमयोरुन्नयत्वोत्थापकत्वाविशेषात्॥ समासोक्तिगर्भतांविनाचुंबनात्प्रेक्षायानिरालंबनत्वाच्च॥ ततश्चात्रोत्प्रेक्षासमासोक्त्योरेककालयोःसमप्राधान्यं॥ यद्यप्यत्रोपमान्यशशिनिशागतावेवधर्मौसंपद्येते॥ नतुशशिनायकत्वनिशाकांतत्वयोश्चसाधारणधर्मौ॥ साधारणधर्मसमर्थनंचोल्लेक्षासमासोक्त्योरपेक्षितमुल्लेक्षायाः॥ प्रकृताप्रकृतसाधारणगुणक्रियारूपनिमित्तसापेक्षात्समासोक्तेर्विशेषणसाम्यमूलत्वाच्च॥ तथापिवाक्योक्तोपमायाइवकारस्यमरीचिभिरिवेत्यनयोस्तरमन्युपगम्यान्वयलब्धस्यप्रकृताप्रकृतयोरेकविषयस्यार्थद्वयसमासोक्त्यपमायांसरोजसदृशंलोचनमितिसमासांतरमन्युपगम्यसमासेनदलब्धार्थद्वयस्यानेदाध्यवसायेनसाधारण्यंसंपाद्यचतयोरुल्लेक्षासमासोक्त्यंगतानिर्वाह्या॥ यद्वा॥ इहप्रकृतकोटिगतानांमरीचितिमिरसरोजानांअप्रकृतिकोटिगतानांअंगुलिकेशसंचयलोचनानांचतनदी

र्घावरणवरणनीलरंभ्रत्वकांतिमत्त्वादिनासदृशानांप्रतिसिद्धरूपेणनेदवदनुगतसादृश्यप्रयोजकरूपेणानेदोप्यस्ति॥सचा
त्रविवक्षितएवनेदाभेदोभयप्रधानोपमेत्यलंकारिकसिद्धांतात्॥तत्रचप्रयोजकोशनिष्ठधर्म्यन्यायेनाभेदगर्भत्वोशोपजी
वनीनसाधारण्यंसंपाद्यप्रधानभूतोलक्ष्यासमासोक्त्यंगतानिर्वाह्या॥नहिप्रकाशनशीतापनयनशक्तिमतःसौरतेजसः॥
शीतापनयनशक्तिमत्त्वेणशीतापनयनयोगितानदृष्टा॥एवमनन्यथंगमेचे॥पांड्योयमंसार्पितलंबहारःकृष्णागरागोहरिचंदनेन॥आक्रांतिबालातपतप्तसानुःसनिर्झरोद्वारइवाद्रिराजः॥इत्यत्रापुपमापिननिर्वहेत्॥नह्यत्राद्रिराजपांड्र
योरुपमानोपमेययोरनुगतसाधारणधर्मोनिर्दिष्टः॥एकत्रबालातपनिर्झरावन्यत्रहरिचंदनहारावितिधर्मनेदात्॥तस्मा
त्रबालातपहरिचंदनयोर्निर्झरहारयोश्चसदृश्योरनेदांशोपजीवनमेवगतिः॥पिनष्टीवतरंगाग्रैःसमुद्रफेनचंदनं
तदाशयकरैरिंदुर्लिपतीवदिगंगनाः॥अत्रोक्षयोःकालनेदेपिसमप्राधान्यं॥अन्योन्यनिरपेक्षवाक्यद्वयापन्नत्वात्॥
तदाशयेतिफेनचंदनरूपकमात्रोपजीवनेन॥पूर्वोक्षानपेक्षणात्॥नचेवलिंपतीवतमोंगानीतिवदुक्षाद्वयस्यसंसृ
ष्टिरेवेयमितिवाच्यं॥लोकिकप्रसिद्धषणक्षेपनयोर्वापर्यछायानुकारिणोक्षाद्वयपोर्वापर्येणचारुतातिशयसमुन्मेषतः
संसृष्टिवैषम्यात्॥तस्मादृशादिवदेकफलसाधकतयासमप्राधानमिदमुक्षाद्वयं॥एवंसमप्रधानसंकरोपिव्याख्यातः॥
संदहसंकरोयथा॥शशिनमुपगतेयंकौमुदीमेघमुक्तंजगनिधिमनुरूपंजन्मुकन्यावतीर्णा॥इतिसमगुणयोगप्रीतयस्तत्र
पौराःश्रवणकटुनृपाणामेकवाक्यंविवव्रुः॥९७॥इयमितिसर्वनाम्नायद्यद्भूतवतीदुमतीविशिष्टरूपेणानिर्दिश्यते
तदाबिंबप्रतिबिंबनावापन्नधर्मविशिष्टयोः॥सदृशयोरेक्यारोपरूपनिदर्शना॥यदितेनसास्वरूपेणेवनिदर्श्यतेबिंबरू
पधर्मस्तूपबंध्रस्तावात्समगुणयोगप्रीतयइतिपौरविशेषणाच्चगम्यतेतदाप्रस्तुतेधर्मिणितद्भूतप्रतिबिंबभूताप्रस्तु
तरूपतारोपरूपललितमित्यध्वसायात्संदेहः॥विलीयेंदुःसाक्षान्मृदुतरसवापीयदिनवेत्कलंकस्तत्रसोयदिचविक
चेंदीवरवनं॥तमःस्नानक्लांताजनितजडनावेरवयवेकदाचिन्मंचेयंमदनशिखिपीडापरिनवं॥९८॥अत्रयद्येतावत्
साधनंसंपद्यतेतदातापःशाम्यद्दिशेतावत्स्यर्थकविसंरंभश्चेत्तदापात्तसिध्यर्थमूहरतिसंभावनालंकारः॥एतावत्साधनं
कदापिनसंभवत्येवअतस्तापशांतिरपिगगनकुसुमकल्पत्वेस्यर्थकविसंरंभश्चेदुपात्तमिथ्यात्वसिध्यर्थंमिथ्यार्थांतरकल्प

नारूपामिथ्याध्यवसितिरिष्टनयंयथासन्नवासंदेहः॥एवं॥सिक्तंस्फटिककुट्टांतःस्थितिश्चेतीक्षतैर्जलैः॥मौक्तिकंचेक्षतांस्तेततत्पुष्पेस्तेसमंयशः॥९९॥इत्यादिष्वपिसंभावनामिथ्याध्यवसितिसंदेहसंकरोद्रष्टव्यः॥मुखेनगरलंमुंचन्मूलेयदि
महोरगः॥फलसंदोहगुरणातरुणांकिंप्रयोजनं॥५००॥अत्रमहोरगश्चोतवर्ण्यमानेराजद्वारूढखलश्चोतोपिप्रतीय
ते॥तत्रकिंवस्तुतस्तथाभूतमहोरगश्चोतएवप्रस्तुतेप्रस्तुतःखलश्चोतस्ततःप्रतीयतइतिसमासोक्तिः॥यथावा॥
प्रस्तुतप्रखलश्चोतप्रत्यायनायाप्रस्तुतमहोरगश्चोतकीर्तनमित्यप्रस्तुतप्रशंसा॥यद्वादृश्यमानमहोरगश्चोत
कीर्तनेनसमीपस्थितखलमौद्धाटनंक्रियतइत्यप्रस्तुतस्यापिप्रस्तुतत्वात्प्रस्तुतांकुरइतिसंदेहः॥एकवाचकानुप्रवेश
संकरतुशब्दार्थालंकारयोरेवेतिलक्ष्यतिताकाव्यप्रकाशकारउदाजहार॥स्पष्टोच्छ्वासिकिरणकेसरसूर्यबिंबविस्तीर्ण क
र्णिकमधोदिवसारविदं॥श्लिष्टाष्टदिग्दलकपालमुखावतारबह्वंधकारमधुपावलिसंचुकोच॥१॥अत्रैकपदानु प्र
विष्टोरूपकप्रासो॥यत्रैकस्मिन्श्लोकैकपदेनशब्दार्थालंकारयोःस्थितिस्तत्रसंसृष्टिः॥इहतुसंकरइतिअलंकारसर्व
स्वकारस्तूक्तेकस्मिन्वाचकेनुप्रवेशोवाच्ययोरेवालंकारयोःस्वारसिकःवाच्यप्रतियोगिकत्वाद्वाचकस्येतिमत्वार्थालंकारयो
रपिएकवाचकानुप्रवेशंसंकरमुदाजहार॥सत्युष्करद्योतितरंगशोभिन्यमंदमारब्धमृदंगवाद्ये॥उद्यानवापीपयसीवयस्य
मिणीदृशोनाद्यगृहेरमंते॥२॥अत्रनाद्यगृहवापीपयसोःसत्युष्करेत्यादिविशेषणशब्दसाम्यश्लेषः॥अमंदमारब्धेत्या
दिविशेषणेर्थसाम्यमपमातदुभयमेकस्मिन्निवशब्देनुप्रविष्टमितितदपिनमन्यामहे॥सत्युष्करेत्यादिविशेषणेपि
श्लेषनिमित्तकानेदाध्यवसायरूपातिशयोक्तिलक्ष्यस्यधर्मसाम्यस्यैवतत्रेवशब्दप्रतिपाद्यतयाशब्दसाम्यस्यतदप्रतिपा
द्यत्वात्॥श्लेषनिमित्तकानेदाध्यवसायेनधर्मसाम्यलाभानंगीकारे॥अहोरागतीसंध्याजहातिस्वयमंबरमित्या
दिश्लिष्टविशेषणसमासोक्त्युदाहरणेविशेषणसाम्याभावेनसमासोक्त्यभावप्रसंगात्॥शब्दसाम्यस्यैवशब्द
प्रतिपाद्यत्वेपितस्योपमावाचकत्वस्यैवाभावाच्छब्दतोर्थतोवाकविसंमतसाप्रतिपादने
सर्वविधेष्युपमालंकारस्वीकारात्॥अन्यथा॥यथाह्लादनश्चंद्रःप्रतापस्तपनोयथा॥तथैवसोभूदन्वर्थोरा

ज्ञा प्रतिरंजनात्॥५०३॥ इत्यन्नाप्युपमानस्यात्॥ नह्यन्वर्थनामरूपराङ्सामर्थ्यं विनाकिंचिदर्थसामर्थ्यं कविविवक्षितमस्ति॥ तस्माच्चैकस्मिन्नर्थे प्रतिपाद्यमाने लंकारद्वयलक्षणयोगादलंकारद्वयप्रतीतिः॥ तत्रतयोरलंकारयोरेकवाचकानुप्रवेशः॥ यथा॥ विधुकरपरिरंभाद्दात्मनिस्यंदपूर्णाद्दृषदुपकुट्टेरालवालेस्तरूणां॥ विपुलितजलसेकप्रक्रियागौरवेण व्यरचिसहृतचित्तस्तत्रनेमीवनेन॥४॥ अत्रहिप्रतिपाद्यमानोर्थः समस्तमहस्तवर्णनमुदात्तमितिलक्षणानुसारादुदात्तालंकाररूपाः॥ असंबंधेसंबंधकथनमतिशयोक्तिरितिलक्षणादतिशयोक्तिरूपश्च॥ नचसर्वोदात्तस्यासंबंधेसंबंधकथनरूपत्वंनियतमितिनविविक्तालंकारद्वयलक्षणसमावेशोस्तीतिवाच्यं॥ दिव्यलोकगतसंपत्समस्तमहिमवर्णनादिघतिशयोनरस्पृष्टस्योदात्तस्यशौर्यदारिद्र्यादिविषयातिशयवर्णनेषूदात्तास्पष्टयाअतिशयोक्तेश्चपरस्परविविक्ततयाविश्रांतेः॥ तयोश्चेहार्थवशात्संपन्नसमावेशयोर्नांगांगीभावः॥ केएनापरस्यानुस्यूतनात्॥ स्वातंत्र्यपारतंत्र्यविशेषदर्शनाच्च॥ नापिसमश्राधान्यं॥ येःशब्दैरिहसमस्तमहिमवर्णकस्योदात्तस्यप्रतिपाद्यतेतेरेवतस्यैववस्तुनोसंबंधेसंबंधरूपस्यप्रतिपाद्यमानतयाङ्गिनःप्रतिपादकशब्दव्यवस्थितार्थत्वेदाक्षात्॥ नापिसंदेहसंबंधिवस्तुकरः॥ एकालंकारकोद्योतदन्यालंकारकोटिप्रतिक्षेपान्नावात्॥ तस्मादिहोदात्तातिशयोक्त्योरेकवाचकानुप्रवेशलक्षणःसंकरः॥ क्वचित्संकराणांमपिसंकरोदृश्यते॥ यथा॥ मुक्ताःकेलिविसूत्रहारगलिताःसंमार्जनीविहृताःप्रातःप्रांगणसीम्नि मंथरचलद्वालोद्भिलाक्षारुणाः॥ दूराद्दाडिमबीजशंकितधियःकर्षंतिकीरास्तुकायद्दृङ्नेषुनोजरुपतेत्स्यागलीलायिते॥५॥ अत्रतावद्दिदुर्गासंपत्समस्तमहिमवर्णनात्मकउदात्तालंकारः॥ तन्मूलकोवाक्षांद्भिलाक्षारुणादत्यत्रतद्गुणालंकारः॥ तत्रैववक्ष्यमाणश्लोकेपदार्थहेतुकःकाव्यलिंगालंकारश्चेतितयोरेकवाचकानुप्रवेशसंकरः॥ तन्मूलःशंकितधिय इत्यत्रभ्रांतिमदलंकारः॥ तान्योन्योदात्तालंकारश्चारुतांनीतइतितयोस्तस्यचांगांगीभावेनसंकरः॥ एवंविदूहृदयेनवस्यहेतुमतोराज्ञोवितरणविलासस्यहेतोश्चान्यदकथनंहेत्वलंकारः॥ सचराज्ञोवितरणविलासस्यनिरतिशयोत्कर्षान्नित्यक्रियत्वंवसायितावन्मात्रेकविसंरंभश्चेदुक्तरूपोदात्ता

लंकारपरिष्कृतेहेत्वलंकारेविश्रांतिः वर्णनीयस्यराज्ञः कीदृशीसंपदितिप्रश्नोत्तरतयानिरतिशयैश्वर्यवितरणरूपात्प्रस्तुतकार्यमुखेनतदीयसंपदुत्कर्षप्रशंसनेपिकविसंरंभश्चेत्कार्यनिबंधनात्प्रस्तुतप्रशंसालंकारेविश्रांतिः॥ कार्यस्यापिवर्णनीयत्वेनप्रस्तुतत्वान्निश्चयेतुप्रस्तुतांकुरेपिविश्रांतिः॥ अत्रविशेषानध्यवसायात्संदेहालंकारः॥ किंच॥ विद्वद्धृदयवैद्यवर्णनस्यासंबंधेसंबंधकथनरूपतयातिशयोक्तिरूपदात्तालंकारेणसहैकवाचकानुप्रवेशःसंकरः॥ निरतिशयवितरणोत्कर्षशालिनोहेत्वलंकारस्यास्यद्भूतातथ्योदार्यवर्णनात्मकतयास्तुत्यासहैकवाचकानुप्रवेशःसंकरः॥ तन्मूलकस्याप्रस्तुतप्रशंसालंकारस्यप्रस्तुतांकुरस्यवाराजसंपत्समस्तमहिमवर्णनात्मकोदात्तालंकारेणसहैकवाचकानुप्रवेशसंकरः॥ वाचकशब्दस्यप्रतिपादकमात्रपरतयाव्यंजकसाधारण्यादेषांचत्रयाणामेकवाचकानुप्रवेशसंकराणांसमप्राधान्यसंकरः॥ नह्येतेषांपरस्परमन्यत्रांगत्वमस्ति॥ उदात्तादिमात्रस्यैवहेत्वलंकारादिचारुतापादकत्वेनातिशयोक्तिसंकरस्यांगांगितयानेपेक्षितत्वात्॥ एवमत्रश्लोकेचतुर्णांसंकराणांयथायोग्यसंकरः॥ एवमन्यत्रापुदाहरणीन्यूहनीयानि॥५०६॥ अमुंकुवलयानंदंधीक्षितः॥ नियोगाद्दिकटयतेनिरुपाधिकयानिधेः॥१॥ चंद्रालोकाविजयतोशरदागमसंभवः॥ हृद्यःकुवलयानंदोयत्प्रसादादयंदृयं॥२॥ ॥ इतिश्रीमद्दीक्षितविद्वाचार्यश्रीवेंकटरंगाध्वरीद्वयरसूनोरप्पदीक्षितस्यकृतिः॥ कुवलयानंदःसमाप्तः॥ शके १७९७ पार्थिवनामसंवत्सरेश्राद्रपदशुद्धचतुर्दश्यांरविदुर्वारेद्वितीयप्रहरे॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017